

वि ना य क वी र गा था

[हिन्दुहृदयसम्राट् स्वातन्त्र्यवीरः]

शारदा

सौर ज्येष्ठ-श्रावण १८८८

जून · जुलै १९६६

संस्कृत-पत्रकारिता-शताब्दी-महोत्सव-प्रकाशनम्

अथातो विनायकवीरगाथा

'अद्यतनं भवदीयं साहसं श्वस्तनः सिद्धार्थः' इति शारदाकारेभ्यः वरप्रदानं कुर्वाणाः स्वातन्त्र्यवीर सावरकर तात्यारायाः योगेन अन्ते तनुं परित्यज्य सूर्यमण्डलं भित्त्वा स्वात्मनः मातृभूमेश्च धन्यतां विश्वेतिहासे समस्थापयन् इति सर्वे जानन्ति एव। भाषाशुद्धतान्दोलने संस्कृतज्ञैः अग्रतःसरैः भवितव्यम् इति तैः समये समये आदिष्टाः वयम्। तेषां महानिर्याणेन शोकसागरमग्नैः अपि अस्माभिः कर्तव्यधिया निवापाञ्जलित्वेन सश्रद्धं प्रकाश्यते संप्रति **वि ना य क - वी र - गा था।** 'शारदा' भक्तोत्तमैः डॉ. पळसुलेगजाननरायैः श्रीदासनवमी (माघ- कृ. ९ शके १८८७) पुण्यक्षणे सज्जनगडदुर्गे श्रीसमर्थ-रामदासस्वामि-समाधि-पवित्रपरिसरे विनायकवीरगाथासंकीर्तनस्य 'श्रीगणेशः' कृतः। स्वातन्त्र्य वीरेषु जीवत्सु एव प्रकाशनीयं चरितम् इदम् इति कृतसंकल्पाः अपि वयं तथा कर्तुं नैकविघ्नप्राबल्याद् अक्षमाः इति सक्षमायाचनं प्रकटीकुर्मः। अस्तु नाम। कालाय तस्मै नमः।

शारदा-गौरव-ग्रन्थमालायाः भूषणम् इदं चरितरत्नं पाठं पाठं पाठकाः स्वात्मानं पावयन्तु। "गतं संस्कृतं, विनष्टं संस्कृतम्" इति सांप्रतिक-संस्कृत-साहिती-विरोधक-दिवाभीतानां घूत्काराः समूलं विनष्टाः भविष्यन्ति सुबोधस्य सुरसस्य विश्वमनोज्ञस्य ललितस्य हृद्यस्य रमणीयस्य संस्कृतचरितादर्शस्य अस्य पठनेन। अधिकं प्रत्यक्षमेव। शारदाकारेभ्यः स्वान् स्वान् एतद्विषयकान अभिप्रायान् ज्ञापयितुं सपदि पठ्यताम् —**अथातो विनायक-वीर-गाथा।**

* * *

"गोहत्यानिरोधार्थं ममैव भवतु बलिदानम्"

नागपुरम्-गुरुपूर्णिमा (२ जुलै १९६६)

भारतवर्षे शासनेन गोहत्या-निरोधः नैव करिष्यते चेत् मया एव स्वात्मार्पणं कर्तव्यं भवेत् प्रश्नस्य अस्य समाधानार्थं कस्यचन बलिदानस्य आवश्यकता चेत् तदर्थं मादृक्षेण संन्यासिना एव किमिति पुरःसरेण न भाव्यम्? इति पृच्छापराः गोवर्धन (जगन्नाथपुरी) पीठाधीश-परमपूज्य-श्रीमद्-जगद्गुरु-श्रीशंकराचार्यचरणाः राष्ट्रीय-स्वयंसेवक-संघस्य गुरुपूजा-समारोहे।

शारदा-गौरव-ग्रन्थमाला....१२

विनायकवीरगाथा

[हिन्दुहृदयसम्राट् स्वातन्त्र्यवीरः]

लेखकः

डॉ. गजानन बाळकृष्ण पळसुले
एम्. ए.

मूल्यम्—रूप्यकत्रयम्

प्रकाशकः

वसन्त अनन्त गाडगीळ
शारदा-गौरव-ग्रन्थमाला
४२५ सदाशिव-विभागः पुण्यपत्तनम् २ ।

मुद्रकः

वसन्त अनन्त गाडगीळ
शारदा-मुद्रण-सिद्धि-मन्दिरम्
यशवन्त मुद्रणालयः
१८३५ सदाशिव, पुण्यपत्तनम् २ ।

प्राप्तिस्थानानि - शारदाकार्यालयाः

(१) खजिना-महाल-भवनम्
४२५ सदाशिव विभागः
पुण्यपत्तनम् २ ।

(२) द्वारा–म. म. प्रा. द. वा. पोतदार
४९८ शनिवार विभागः
पुण्यपत्तनम् २ ।

(३) पं. ल. म. चक्रदेव
श्रीवत्स-बाल-मन्दिरम्
३१८ राममोहनरायमार्गः
मुम्बई ४ ।

प्रास्ताविकम्

जीवितक्रमा महाजनानाम्
कुर्वन्त्येवं सदा स्मारणाम्
शक्यं जीवितमुच्चैः कर्तुम्
पदचिह्नानि च अवशेषयितुम्
कालवालुकातले विशाले
विलोक्य यानि च भविष्यकाले
भवाब्धिपथिको भग्ननौरपि
धृतिं धारयेदसहायोऽपि

एवं किल महापुरुषाणां चरित्राभ्यासस्य फलं लाँगफेलो निर्दिशति। काले काले नियतिनियुक्तस्य प्रयोजनस्य संपादनायेव भवति तेषां जन्म। तदर्थमिव च लब्धाऽस्ति तैः ईश्वरदत्ता गुणसंपत्। येषु च अवतारकृत्यं समाप्य निजधाम गतेष्वपि, तेषां चरितं स्फूर्तिं विकिरत् आस्ते। मार्गभ्रष्टानां दीपस्तम्भायते। चञ्चलानां ध्रुवतारायते।

अचिर-दिवंगताः स्वातन्त्र्यवीराः वि. दा. सावरकर महाभागाः, एतादृशेष्वेव महापुरुषेषु अन्यतमाः। सत्यं कदाचित् कल्पितकथातोऽपि चमत्कृतिपूर्णं भवति इत्युच्यते। सावरकरचरितमेव अत्र निदर्शनम्। यस्मिन् वयसि विष्टिकादण्डेन, गुटिकाभिर्वा क्रीडनात् न किंचन परं जानन्ति बालकाः, तस्मिन् शैशवे सावरकरैः देवीपुरतः कृता सा राष्ट्रस्वातन्त्र्यार्थम् आमरण-समरकरणप्रतिज्ञा। लण्डने कृताः ताः गूढमन्त्रणाः ते च शस्त्रसंग्रहप्रयत्नाः — सिंहस्य गुहामिव प्रविश्य तस्यैव प्रसभं सटाकर्षणायमाणः स व्यापारः। मार्सेलिससमीपे आत्मानं समुद्रे प्रक्षिप्य कृतः सः अद्भुतः पलायनप्रयत्नः। तद् अश्रुतपूर्वं (अश्रुतोत्तरं च) जीवितद्वयात्मकं निर्वासनम्। तदुत्तरं हिन्दुत्वस्य सैनिकीकरणस्य च कृतः सः झञ्झावातायमानः प्रचारः। तद् गान्धिवधोत्तरम् अभियुक्तत्वेन न्यायालये स्थानम्। स च योगेनान्ते तनुत्यागः। केषांचिदेव नेतॄणां जीवितम् एवं प्रसभाकर्षकं स्यात्। अण्वीमपि अतिशयोक्तिम् अकृत्वा, केवलं यथास्थितं निवेद्यमानमपि सावरकर-चरितम् अनल्पं रोचकं स्यात्।

तदीदृशं चरितं मराठी-प्रभृतिषु कासुचिद् भाषासु वर्तते । संस्कृतं तु तेन वञ्चितमेव अस्ति । लो. टिळक, डॉ. राजेन्द्र प्रसाद, पं. नेहरू इत्यादीनां केषांचन नेतॄणां चरितानि संस्कृते सन्ति । तत्र सावरकर-चरितस्य तु अभावः ममैकं हृदयशल्यम् आसीत् । महाकवीनां प्रा. श्री. भा. वर्णेकराणां 'विनायक-वैजयन्ती' रूपेण सावरकर–शतकस्तोत्रे सत्यपि नास्ति संस्कृते किंचित् सावरकर-चरितम् । जनानां संस्कृते आस्था यदि इष्यते, तर्हि संस्कृतेनापि जने आस्थावता भाव्यम् । जनानां संस्कृताभिमुखता यदि अभीप्सिता, तर्हि संस्कृतेनापि जनाभिमुखेन भाव्यम् । तदेव संस्कृतं जनमानसम् आक्रष्टुं समर्थं स्यात्, यस्य आशयः जनजीवनसंबद्धः स्यात्, यच्च सरल-सुबोधं स्यात् । यस्य च सरल-सुबोधस्य सतोऽपि न हीयेत सामर्थ्यम् । न हीयेत सौन्दर्यम् ।

एषु दिनेषु वर्धते सावरकर-चरिते जनानां जिज्ञासा । तस्याः पूर्तिकरस्य वाङ्मयस्य अद्यपर्यन्तम् अनुभूयमाना त्रुटिः एतेन पुस्तकेन अंशतः पूरिता स्यात् । 'चरितम्' इदं न्यूनतोन्यूनं सुबोधं प्रतीयेत इति आशासे । ततः परं तु 'न खलु तद् वाच्यं वधूबन्धुभिः ।'

एतच्चरितलेखने मराठ्यां श्री. शि. ल. करंदीकर महाभागैर् लिखिते द्वे सावरकर-चरिते भूरि उपकारिणी अभवताम् । यत्सत्यम् आदर्शभूतस्य चरितलेखनस्य परिपाटी मराठ्यां मन्ये तैरेव प्रवर्तिता । अस्य पुस्तकस्य प्रकाशनभारम् अङ्गीकृत्य शारदासंपादकैः पं. वसन्त गाडगीळ महोदयैः प्रचोदितोऽहम् एतत्कर्मणि प्रवृत्तः । यत् सत्यम् 'प्रकाशकस्य दुःखानि न वेत्त्यन्यः प्रकाशकात्'– विशेषतश्च संस्कृत-विषये । अतस्तेऽत्र सविशेषं धन्यवादार्हाः ।

गुरुपौर्णिमा १८८८ —ग. बा. पळसुले
दि. २ जुलै १९६६

माघ व. ९, शके १८८७
१३–२–६६

अस्ति कश्चित् महापुरुषः । स मुम्बापुर्यां वसति । चिरं रुग्णशय्याशरणः स इदानीं मृत्युं प्रतीक्षमाण आस्ते । बहुवारम् 'एहि, मृत्यो! एहि,' इति पूर्वम् तेन आहूतोऽपि भयभीत इव नोपातिष्ठत मृत्युः । अधुना तु अद्यश्वीनमिव मरणम् । सिद्धोऽस्ति कृतकृत्यतया तस्य स्वागताय अयं महापुरुषः ।

कृतकृत्यतया । बाल्ये वयस्येव तस्य अभूत् आत्मनो जीवितकार्यस्य साक्षात्कारः । यच्च तेन 'वरं जनहितं ध्येयं केवला न जनस्तुतिः' इति वाक्यं सूत्रयता निर्व्यूढम् । यदर्थं च सर्वात्मना व्ययीकृता देवदत्ता अन्यदुर्लभा गुणसंपत् ।

यश्च कवीनां कविः, दार्शनिकानां दार्शनिकः, ऐतिहासिकानाम् ऐतिहासिकः, सारस्वतानां सारस्वतः, नेतॄणां नेतृतमश्च । यश्च अलब्धराजसत्कारोऽपि हिन्दुहृदयसम्राट्पदं स्वयम् अधितिष्ठति ।

आम् । सावरकर-कुलोत्पन्नः दामोदरसुतः विनायकः अस्य प्रबन्धस्य नायकः । यस्य 'स्वातन्त्र्यवीर' इति अनन्यगामी शब्दः ।

अथेदम् आरभ्यते सावरकर-चरितम् ।

१. भवो हि लोकाभ्युदयाय...

अन्येषां चित्पावन-कुलानामिव सावरकरकुलस्यापि कोङ्कणः अभिजनः। पेशवाकाले 'देशम्' आगत्य नासिक्यमण्डले भगूर इत्याख्ये ग्रामे वासिष्ठगोत्राणां सावरकराणां हर(रि)भट्ट: इत्याख्यः पूर्वपुरुषः वसतिम् अकरोत्। तस्य पुत्रः महादेवभट्टो नाम आसीत्, यस्मै १७५६ खिस्ताब्दे तदानींतनेन पेशवामात्येन नानासाहेब इत्यनेन राहुरी-ग्रामः भुक्तिभूमिरूपेण प्रदत्तः। उभावपि पितापुत्रौ विख्यातौ दीक्षितौ आस्ताम्। अन्येषामपि तेषां तेषां पेशवामात्यानां काले तैस्तैः सावरकर-वंशीयैः पुरुषैः अनल्पा राजसेवा कृता इति नैतद् अविदितं ऐतिहासिकानाम्।

१८५७ वर्षे स्वातन्त्र्ययुद्धावसरे विनायकस्य ज्येष्ठः पितृव्यः बापुकाका नाम २५ वर्षदेशीय आसीत्। तस्माच्च किंचिद् ऊनवयस्कः आसीत् दामोदरो नाम तस्य कनीयान् भ्राता। अण्णा इत्युपाख्यः अयमेव अस्मत्-कथानायकस्य पिता।

दामोदरपन्तानां भार्या 'मनोहर'-कुलसंभूता राधाबाई नाम आसीत्। विनायकस्य इयं माता दानशीला शुचित्वप्रिया च आसीत्। विनायकरायेषु यत् लता-वृक्ष-वात्सल्यम् तद् अस्या मातुरेव तेषु संक्रान्तम्। अस्याः सुगृहिण्याः कारणात् दामोदरपन्तानां गृहस्थाश्रमः सुखाय अकल्पत। केवलम् एकमेव हीयते। एतयोः उभावपि प्रथमजातौ पुत्रौ अर्भकौ सन्तौ एव लोकान्तरं गतौ। तयोरिदम् अनपत्यता-जन्म दुःखं व्यपनेतुं १८७९ खिस्ताब्दे पुत्रः संजातः यस्य गणेश इति नाम कृतम्। 'बाबा' इत्युपाख्योऽयं विनायकरायाणां ज्येष्ठो भ्राता तेषु आमरणं सुतनिर्विशेषां प्रीतिं चकार।

गणेशजन्मानन्तरं चतुर्भिर् वर्षैः नाम १८८३ खिस्ताब्दे, मे-मासस्य २८ दिनाङ्के (शाके १८०५, वैशाख व. ६) अस्माकं कथानायकस्य जन्म अभूत्। तस्य **विनायक** इति नाम कुर्वतोः पित्रोर् मनसि यः कोऽपि अभिप्रायोऽस्तु। बालकस् तावद् अयम् उत्तरायुषि जनानां विशेषो नायकोऽभवत्, स्वीयं च नामधेयम् अर्थवत् चकार।

पारंपरिकी दुर्गोपासना

बालविनायकः स्वीयेन दर्शनसुभगेन मुखमण्डलेन, मधुरैर् अव्यक्त-वचनैः, तथा च बालसुलभया लीलया न केवलं पित्रोरेव, आसन्नवर्तिनां सर्वेषामेव चित्तं जहार। प्रौढभावे आस्तिकत्वेन अप्रसिद्धस्य तस्य शैशवे देवालयनिर्माणे विशेषा प्रीतिरासीत्। शिशोरपि सतोऽस्य स्मरणशक्तिः तथैव तीव्रा आसीत्, यथा जिज्ञासा। सावरकराणाम् आराध्यदैवतम् अष्टभुजा देवी आसीत्। शैशव एव पितुर्मुखात् पाठवेलायां श्रावं श्रावं समग्रा सप्तशती विनायकस्य कण्ठस्थप्राया बभूव। अस्मिन्नेव काले निहितदेवीभक्तिबीजेन विनायकेन 'दुर्गादासविजय'नाम्नी देवीभक्तानां चरितमाला प्रणेतुं संकल्पिता।

१८९० ख्रिस्ताब्दे अयं बटुः उपनीतः। आह्निक-कर्मप्रवणेन तीव्र-स्मरणशक्तिना च अनेन बटुना कैश्चिदेव दिनैः कण्ठस्थीकृता संध्योपासना तस्य धोपावकरनाम्नः उपाध्यायस्य महान् अभिमानविषय आसीत्। शालीयैः पुस्तकैः सहैव 'निबन्धमाला', 'पेशव्यांची बखर' इत्यादिः यो यो ग्रन्थः तस्य हस्ताभ्यासम् आगतः, स स तेन बुभुक्षितेन इव आमूलचूलं पठितः। एकदा च आरण्यकानां पठने मग्नमना विनायकः 'अयुक्तं गृहे आरण्यकपठनं नाम' इति मन्यमानेन पित्रा यत्नेन निवारितः! 'गुराखी', 'केसरी' इत्यादीनां वृत्तपत्राणां पठनेऽपि न स प्रमाद्यति स्म।

एतद्विविधवाचनवशात् विनायकस्य बुद्धिः बाल्य एव कामपि प्रौढताम् आप। अत्र विषये द्वे आख्यायिके निर्देशम् अर्हतः। एकदा कुतश्चित्कारणात् विनायकः मातरि कुपितः। पश्चात्तु जातानुतापः 'नाहं पुनरपि जनन्यै कोपिष्यामि' इति तेन प्रतिज्ञातम्। अनुपदं तु यद्यत् पूर्वस्मिन् कल्पे वृत्तम्, तदेव तथैव अन्यस्मिन् कल्पे पुनरावर्तते इति कुतोऽपि श्रुतं वचनं तस्य स्मृतिमागतम्, 'मया च आगामिनि कल्पे अवशेनापि जनन्यां कोपितव्यम्' इति विचारेण भृशम् अखिद्यत बाल-विनायकस्य चेतः। अथैकदा 'अरबांचा इतिहास' इत्याख्यं त्रुटित-प्रारम्भिकपृष्ठकं पुस्तकं तस्य हस्ताभ्यासम् आगमत्। तत्पठने समुपजात-कुतूहलो विनायकः नष्टपृष्ठगतविषयम् अन्तरेण पितरं पप्रच्छ। तदीयेन उत्तरेण बालकस्य समाधानं जातं वा न वा, न जानीमः। किंतु निमि-

तेन अनेन सर्वस्यापि इतिहासस्य प्रथमं पृष्ठम् अनुपलम्भनीयम् इति यः सामान्यार्थः तस्य बुद्धिम् आरूढः स खलु अनल्प 'कौतुका 'स्पदम् ।

नैतावता विनायकः कश्चिद् ग्रन्थकीट आसीदिति मन्तव्यम् । तेन अश्वारोहणम् अभ्यस्तम् । धनुर्विद्या परिचिता । मित्रमण्डल्या सह वृक्षराजिषु आहिण्डितम् । एतादृशे अन्यतमे संचारे एकः कृष्णसर्पः विधृत्य तेन कंचित् कालं संनिधौ स्थापितः आसीत् ! द्वादशवर्षदेशीयेन च तेन मुसलमानानाम् अत्याचार-वृत्तैः जातरोषेण प्रतिशोधहेतोः सवयोभिर् मित्रैः सह स्थानिकं मोहम्मदीयं प्रार्थनामन्दिरम् आक्रम्य तस्य विध्वंसने प्रयतितम् ।

अनया साहसिकतया ज्ञानलालसतया च सह एकसंश्रयदुर्लभा रसिकता, परिहासप्रियता, तथा च नाट्यप्रियताऽपि विनायकस्य बालजीवनं संपन्नं चकार । तेन लोकनाट्यानां कृते 'लावणी-'गीतानि रचितानि । स्त्रीवस्त्रपरिधानम् अभिनीय स्त्रीगीतगाने स कौशलं प्रादर्शयत् । अन्त्याक्षरीस्पर्धायां स्वोपज्ञश्लोकानां पठनेऽपि स निजां चातुरीं प्रकटीकरोति स्म ।

१८९२ ख्रिस्ताब्दे विनायकस्य माता दिवं गता । विनायकस्य जीवने रिक्तभूतम् इदं स्थानं तत ऊर्ध्वं चतुर्भिर् वर्षैः पूरितम् इव । १८९६ वर्षे गणेशपन्तानां विवाहः संपन्नः । 'यशोदा'ख्या इयं ज्येष्ठा भ्रातृजाया विनायकस्य द्वितीया मातेव अभवत् ।

विनायकः अधुना चतुर्दशवर्षदेशीयोऽभवत् । भगूरे यावद् अध्येतुं शक्यमासीत्, तावत् तस्य अध्ययनं निर्वृत्तम् । अतः अग्रिमाध्ययनार्थं स पित्रा नासिक्यं प्रेषितः । अत्र प्रारभमाणं सावरकर-चरितस्य नवीनं पर्वं अग्रिमे अध्याये प्रस्तोष्यामहे ।

* * *

२. तेजसां हि न वयः समीक्ष्यते ।

१८९७ ख्रिस्ताब्दे अर्धप्रायव्यतीते, माध्यमिकाध्ययनहेतोः विनायकराया: नासिक्यं प्रेषिताः । तेषां ज्येष्ठो भ्राता प्रागेव अध्ययनेन हेतुना तत्र वसति स्म । शिवाजी-शालायां सावरकराणां नाम प्रवेशितम् । उभाभ्यां भ्रातृभ्यां स्वं स्वम् अध्ययनं प्रारब्धम् ।

प्रारम्भिकः कश्चित् कालस् तावत् एकाकितया सावरकराणाम् आयासकरो बभूव । नासन् केऽपि समानशीलाः सखायः । तदानींतनो नासिक्यजनः तादृश एव आसीत्, यादृशः क्षेत्रस्थ-जनः प्रायो भवति– उदरंभरिः, स्वास्थ्यप्रियः, परनिन्दाप्रवणः, कौलीनप्रसारणे आत्तरतिः, नाटचनर्तनादिषु रङ्गिलः, प्रायेण निरुपद्रवोः निरुपयोगश्च सन्नपि क्वचित् सोपद्रवः सोपयोगश्च । समासेन ध्येयशून्यः । सावरकराणां नासिक्यागमनात् प्रभृति तु परिवर्तितुं प्रारभत इदं क्षेत्रीयं वातावरणम् ।

सावरकराणां पटुप्रसरया बुद्धया नासिक्ये शीघ्रमेव अनुकूलोऽवकाशः आसादितः । प्रभावितानाम् अध्यापकानां मुखात् प्रसर्तुं प्रवृत्तं सावरकराणां बुद्धिवैभवम् । तदानींतन्यां चतुर्थकक्षायाम् अधीयानेन अनेन छात्रेण लिखितः 'हिन्दु संस्कृतीचा गौरव' इत्याख्यो लेखः भूरि भूरि अरोचत 'नाशिक-समाचार'कारेभ्यः खरे-महोदयेभ्यः । प्रकाशितश्च स तैः तस्मिन् पत्रे संपादकीयलेखतया ! तस्मिन्नेव वर्षे वक्तृत्वस्पर्धायामपि स्पर्धालुतया समभिलन्त विनायकरायाः । स्वीयेन वाक्पाटवेन श्रोतॄणां परीक्षकाणां च मनांसि सावरकरैर् वशीकृतान्येव । केवलं प्रकटीकृताः अबालसत्वा विचाराः अस्यैव बालस्य उपज्ञा उत कस्यचिद् अन्यस्य इति परीक्षकाणां शङ्काकुलतया क्षणविघ्नित आसीत् सावरकराणां प्रथमपारितोषिकलाभः । अन्येषां सावरकर-गुणानामिव वक्तृत्वस्यापि चित्तचमत्कारी प्रथमोन्मेषः बाल्य एव आविरासीत् ।

एवं शालीयेन अध्ययनेन सहैव बुद्धिविकासनपरेषु सावरकरेषु सत्सु एका महती घटना अघटत, या न केवलं महाराष्ट्रम् अपि तु समग्रं भारतं भूकम्पकम्पितमिव आस्फालयत् । या च सावरकरमनसि दूरगमं पदम् अकरोत् । सा नाम रॅण्ड-वधः, तन्निमित्तकं च चाफेकराणां देहान्तशासनम् ।

हा हन्त ! आगता सा प्रतिक्षणम् आशङ्किता दुष्टवार्ता । अद्य २६–२–६६ दिने माध्याह्निके वार्ताप्रक्षेपणे उद्घोषितम् आकाशवाण्या— 'निवेदयितुम् एतद् विषीदति अस्माकं चेतः, यद् अद्य दशमिनिटोत्तर-एकादशवादनवेलायां स्वातन्त्र्यवीर विनायक दामोदर सावरकर महाभागा दिवं गताः ।' नाभूत् शक्यं तेषु जीवत्सु इदं तेषां चरितं प्रकाशयितुम् । आरब्धं तु अपरित्याज्यम् । सत्कार-पुष्पाञ्जलिः श्रद्धाञ्जलीभूतः !

विनायकरायाणां प्रायः नासिक्यागमन-समकालमेव एतत् समवर्तत । उद्वेजित आसीत् जनः दुष्कालेन, प्रथमागतेन च 'प्लेग' रोगेण । ततोऽपि तु अधिकः प्रतिबन्धकोपायपराणाम् अधिकारिणाम् अतिरेकितया । अस्यामेव परिस्थितौ क्षते क्षारमिव क्षिपता शासनेन व्हिक्टोरिया-राज्ञयाः राज्यारोहणस्य हीरकमहोत्सवः प्रवर्तितः । परकीयशासनस्य अनेन नृशंसेन व्यवहारेण प्रकुपितैः चाफेकर-भ्रातृभिः हीरकमहोत्सव-दिने (२२–६–९७) एव प्लेग-प्रतिबन्धनाधिकारी रँण्ड, तस्य च आयर्स्ट नाम सहकारी इत्युभौ यमसदनं प्रेषितौ । द्रविड-भ्रातॄणां पैशुन्यवशात् शासनं चाफेकरभ्रातॄन् बन्दिग्राहं ग्रहीतुं प्राभवत् । ज्येष्ठः चाफेकरः दामोदरपन्ताख्यः अभियोगोत्तरं देहान्तशासनम् आदिष्टः । तस्मिन् काले येरवडा-बन्दिशालायां लोकमान्याः टिळकमहोदया अपि निगृहीता आसन् । दामोदरपन्त चाफेकरैः लोकमान्यानां गीता-पुस्तकं प्रार्थितम् । गीताहस्ताश्च दामोदरपन्ताः प्रसन्नचेतसा वधस्तम्भमालिङ्गन् ।

देवीपुरतः स्वातन्त्र्यसमर-प्रतिज्ञा

वृत्तान्तोऽयं सावरकरमनसि दृढं पदम् अकरोत् । प्रवृत्तः तेषां मनसि विचार-झञ्झानिलः । तैः चिन्तितम्—चाफेकरास् तावत् स्वदेश-पीडनस्य प्रतिशोधार्थं वधस्तम्भम् आरूढाः । प्रदीपिताऽस्ति तेषां निर्वाणोन्मुखेन प्राणज्योतिषा शत्रुंजयी वृत्तिः । सा यज्ञकुण्डे समिधम् अनु समिधं प्रक्षिप्य प्रज्वलन्ती स्थापनीया । किम् अन्येषामिव ममापि नास्ति स भारः ? चाफेकराणां कर्म यदि केनचिद् अग्रतःसरं करणीयम् तर्हि किं न मयैव ? एवमादिभिर् विचारैः आकुलितमनस्कैः सावरकरैः अन्ततः देवीपुरतः उपविश्य प्रतिज्ञातम्—

राष्ट्रिय-स्वातन्त्र्यस्य पुनःप्राप्त्यर्थं सशस्त्रक्रान्तेर् ध्वजमुच्छ्रित्य प्रहरन् प्रहरन् अहं अन्तिमोच्छ्वासपर्यन्तं योत्स्ये ।

सावरकरमनसि संजातः क्षोभः श्लोकरूपेणापि साकारोऽभवत् । तैः चाफेकरोपरि काव्यरचना प्रारब्धा । एकदा तु मध्यरात्रौ प्रजागरकृशं, देवीपुरतः काव्यप्रणयने व्यापृतं पुत्रं वीक्ष्य पुत्रवत्सलेन पित्रा स निर्भर्त्सितः । अन्ततो गत्वा विनायकरायैः तत् काव्यं पूर्णतां नीतम् । टिळक-चाफेकरादीन् प्रति निजं संमानं प्रकटीकर्तुं तान् उद्दिश्य एकं नाटकमपि सावरकरैर् लिखितम् । विदितवृत्तान्तैः ग्रामाधिकारिभिस्तु तस्य प्रयोगः प्रतिषिद्धः ।

१८९९ वर्षे सावरकराणां प्रथमं पुण्यपत्तन-दर्शनम् अभवत् । शनिवारवाडा, पर्वती इत्यादीनि इतिहासप्रसिद्धानि स्थानानि दर्शं दर्शमपि न तृप्तिम् आययौ सावरकराणां मनः । अन्येषु 'ताबूत'-प्रेक्षणाय गतेषु विनायकरायाः शनिवारवाडासमीपे तस्य भूतकालिकं वैभवं स्मारं स्मारं रममाणाः चिरम् अतिष्ठन् । अस्यैव पुरतः उत्तरायुषि सावरकराणां विश्वविख्यातानि सार्वजनीनानि व्याख्यानानि अभवन्, यानि तथैव महान्ति आसन्, यथा स्वयं शनिवारवाडा ! —पुण्यपत्तनात् कर्जतग्रामं सावरकरेषु गतेषु घटितः एकः प्रसङ्गः अत्र अवश्यं निर्देष्टव्यः । तत्रापि काचिद् वक्तृत्वस्पर्धा आयोजिता आसीत् । अस्यामपि स्पर्धायाम् सावरकरैः प्रथमपारितोषिकं लब्धम् इति न किमपि चित्रम् । पारितोषिकं तु अभिनवमिव आसीत्—परांजपे शिवरामपन्तैः तदानीं संपाद्यमानस्य 'काळ'पत्रस्य एकवर्षं यावत् निःशुल्कं वितरणम् ! सावरकराणां जीविते अयं प्रसङ्गः किमपि महत्त्वं बिभर्ति । तेषां मनोरचनायां चाफेकरवृत्तान्त इव 'काळ'पत्रस्य लाभोऽपि कयाचित् मात्रया कारणतां यातः । सावरकराणां भाषाशैली, तेषां च प्रखरः स्वातन्त्र्यवादः इत्युभयमपि शिवरामपन्तानां भाषाशैल्याः, स्वातन्त्र्यवादस्य च प्रभावचिह्नानि धारयति ।

अस्मिन्नेव वर्षे नासिक्ये प्लेग-प्रादुर्भावात् सावरकर-भ्रातरौ भगूरं गतौ । प्लेगस्तु तत्रापि प्रसृतः, सावरकर-कुलमपि तेन आक्रान्तम् । प्रथमं सावरकराणां पिता, ततश्च तेषां कनीयान् भ्राता 'बाळ' इत्युभौ

रोगेण ग्रस्तौ । पिता दामोदरपन्तस् तावत् अचिरेणैव पञ्चत्वं गतः । बाळं तु नासिक्ये उपजातपरिचयाः ततश्च बद्धसख्याः दातारमहोदयाः भ्रातृभ्यां सह नासिक्यम् अपनीतवन्तः । तत्र च सः प्लेग-रुग्णालये स्थापितः । तस्य शुश्रूषार्थं ज्येष्ठो गणेशपन्तः स्वजीवितनिरपेक्षः तत्रैव रुग्णालये तस्थौ । अस्मिन्नेव अवसरे म्हसकर इत्याख्येन तत्रत्येन लेखनिकेन सह गणेशपन्तानां परिचयः संजातः ।

मित्रमेलापकः

एते म्हसकर महाभागाः, तथा च तेषां पागे इत्याख्यं मित्रम्, इत्युभयमपि राष्ट्रियमनस्कम् आसीत् । गणेशपन्तद्वारा म्हसकर-विनायकराययोः अन्योन्यपरिचयः संजातः । समानशीलौ मिलितौ । उपक्रमविचारः उपक्रान्तः । गुप्तमण्डल्याः निर्मितेः प्रस्तावः मन्त्रितः । अन्येऽपि सहकारिणः, दातार-वर्तक-प्रभृतयः, अयस्कान्तेनेव अयःशलाकाः, सावरकरैः संलग्नाः । तन्मध्ये आसीत् चरणपङ्गुरपि तरलप्रतिभः आबा (गणेशः) दरेकरः, यः आदौ तावत् 'लावणी' रचनामात्रेण परितुष्यन्नपि अग्रे सावरकरस्पर्शवशात् 'स्वातन्त्र्यकविः गोविन्दः' समपद्यत ।

एवं संगतेषु सहकारिषु गुप्तमण्डलीनिर्मितिः निर्धारिता । नोव्हेम्बरमासे म्हसकराणां शपथग्रहणम् अभूत् । अस्याः मण्डल्याः 'राष्ट्रभक्तसमूहः' इति नाम कृतम् । 'रामहरिः' इत्यासीत् तस्याः संकेतशब्दः । आदौ तावद् द्वित्रा एव तस्याः सदस्याः आसन् । क्रमेण तु तादृश्याः अपि मण्डल्याः आवश्यकता प्रत्येतुम् आरब्धा, या प्रकटरूपा स्यात्, या अशङ्कनीयं कार्यं बाह्यतः कुर्यात्, यस्याश्च सदस्येभ्यः विश्वसनीयभूतानां गुप्तमण्डल्यां समावेशः शक्यो भवेत् । इत्थं विचिन्त्य नवीनवर्षस्य (१९००) प्रथमदिन एव एका प्रकटमण्डली निर्मिताऽभूत्, यस्याः नाम आसीत् 'मित्रमेळा' (मित्रमेलापकः) ।

मित्रमेलापकेन समाजोत्थानहेतुकानि अनेकानि कार्याणि अङ्गीकृतानि । शिवाजि-जन्मोत्सवस्य तेन कायपरिवर्तनं कृतम् । 'नायम् उत्सवः ऐतिहासिकः, किं तु राजकीयः । नष्टस्वातन्त्र्यस्य पुनर्विजेतृतयैव शिव-भूपतिर् वन्दनीयः' इति प्रथममेव अघुष्यत अस्मिन् उत्सवे । मिथश्चर्यायाम् 'विस्मर्यताम् इदानीं क्षुल्लकाधिकारकथा । संपूर्ण

स्वातन्त्र्यमेव अधुना ईप्सितव्यम् ' इत्याग्रहणन्ति स्म विनायकरायाः । एतत्कालिके एकस्मिन् सावरकरीये पद्ये ' हिंदु जे असतील ते मिळवूनी एकी त्वरेने करा ' (ये येऽपि हिन्दवः स्युः, ते ते अविलम्बेन संघटिताः कर्तव्याः ।) इत्येकश् चरणो वर्तते । उत्तरायुषि विनायकरायैः प्रचारितस्य हिन्दुसंघटनस्य बीजावस्थेव अत्र दृश्यते ।

सूकराय मुक्ताहारः

२२-१-१९०१ दिने राज्ञी व्हिक्टोरिया ख्रिस्तवासिनी अभूत् । सप्तम एडवर्डश्च सिंहासनम् आरुरोह । तदानीम् अनेकैः राज्ञीमृत्युनिमित्तकं दुःखं प्रकटीकृतम्, नूत्ने राज्ञि च स्वीया निष्ठा । मित्रमेलापकेनापि शासकवञ्चनार्थम् एवं नाम कर्तव्यम् इति केनचित् सूचितम् । सावरकरैस्तु ' आङ्ग्लानां राज्ञी नाम अस्मच्छत्रूणां राज्ञी । तस्यां च निष्ठाप्रदर्शनं नाम अस्मद्दासभावस्य उद्घोषणम् ' इति सावेशं प्रतिपाद्य विहतः स प्रस्तावः । एतस्मिन् एव काले प्रयोजनवशात् विनायकरायाः त्र्यम्बकेश्वरं गताः । तत्र केनचित् पण्डितेन राज्यारोहणनिमित्तके स्थानिकोत्सवे पठनार्थं संस्कृतश्लोकाः विरचिताः आसन् । तद्विषयकम् अभिप्रायं पृष्टाः विनायकराया अवदन्-अहो सश्रीकता अस्य काव्यस्य ! नायं काव्यबन्धः, अपि तु मौक्तिकबन्धः । दौर्भाग्यात् तु सूकराय प्रदत्तः ! मुक्ताहारः सूकराहारः संवृत्तः ! !

विनायकरायाः अधुना मॅट्रिक-कक्षायाम् आसन् । नासीत् कापि परीक्षोत्तरणचिन्ता । उच्चशिक्षण-चिन्ता तु तान् अधुना व्यथितुं प्रवृत्ता । अथैकदा रुग्णैः अर्धमोहावस्थैः विनायकरायैः आर्तरवेण निजा व्यथा प्रकटीकृता । तदानीं विनायकरायाणां पृष्ठे रक्षार्थं सततम् अचलवत् निश्चलस्थितैः गणेशपन्तैर् आश्वस्तम्-' मा शुचः, वत्स ! सति आवश्यके भिक्षामपि याचिष्ये, तव उच्चाध्ययनं तु सर्वोपायैः संपादयिष्यामि ' । दिष्ट्या नापतिता तादृशी आवश्यकता । यतः अचिरेणैव विनायकरायैः तादृशः पितृनिर्विशेषः श्वशुरः लब्धः, येन जामातुः अध्ययनभारः प्रीतिमता स्वशिरसि आरोपितः । यत्सत्यं नासीत् सावरकराणाम् एवं शीघ्रं विवाहेच्छा । विनायकरायाणां मातुलेन तु भागिनेयं किमपि अपृष्ट्वैव भाऊराव-चिपळूणकराणां ' यमुना'ख्यया (माई) कन्यया सह तस्य

विवाहः निश्चितः। न च मातुलेन सकृत् शब्दे प्रदत्ते सावरकराः 'न' इति वक्तुं प्राभवन्। विवाहोऽयं १९०१ वर्षे नासिक्ये संपन्नः। तेषु तेषु सांसारिकेषु सुखदुःखेषु (भूयसा दुःखेषु!) संविभक्तपतिभागधेयया अनया साध्व्या एकषष्टिवर्षाणि सावरकराणां धर्मदारव्रतं निर्व्यूढम्, उपदर्शितश्च पतिव्रतादर्शः।

मॅट्रिक-परीक्षोत्तरं लब्धोऽवसरः सावरकरैः लेखनव्यापारेण अतिवाहितः। 'पेशव्यामध्ये थोर पेशवे कोण' (पेशवामात्येषु कः श्रेष्ठः) इति विषये स्पर्धार्थं तैर् लिखितो निबन्धः परीक्षकैः सर्वोत्कृष्टतया पारितोषिकार्ह इति निर्णीतः। गोदावरीतीरे कोठूरग्रामे मातुलगृहे अस्मिन् काले वसद्भिः सावरकरैः 'गोदावकिली' नाम काव्यं विरचितम्, यत्र मोरोपन्तस्य 'गङ्गावकिली' इत्याख्यस्य काव्यस्य छाया वर्तते। सावरकराणाम् अस्मिन् काव्ये पारतन्त्र्यकृता मनोव्यथा स्पष्टं प्रतिबिम्बिताऽस्ति।

यथाकालं विनायकरायाः मॅट्रिक-परीक्षाम् उत्तीर्णाः, तैश्च उच्चाध्ययनार्थं पुण्यपत्तनीये फर्ग्युसन-महाविद्यालये स्वीयं नाम निवेशितम्।

* * *

३. महाविद्यालयीनं जीवितम्

१९०२ ख्रिस्ताब्दस्य जानुअरी-मासे विनायकरायाः नासिक्यं परित्यज्य पुण्यपत्तनं गताः, फर्ग्युसन-महाविद्यालयं च प्रविष्टाः। क्षुद्रपल्वले पर्याप्तम् अवकाशम् अलभमानो मत्स्यः विशालं जलाशयं प्रविष्टः। पुण्य-पत्तनं सदैव महाराष्ट्रस्य सांस्कृतिकी राजधानी। अन्या विचारधारा इव राजकीया राष्ट्रियाश्च विचारौघा अपि पुण्यपत्तने उद्भूय सर्वतोदिशं प्रसरन्ति स्म। तदानीं पुण्यपत्तनीये राजकीय-नभःप्राङ्गणे लोकमान्यः टिळकः, तथा च शिवरामपन्त परांजपे इति भास्वरं तेजोद्वयं समकालं प्रकाशमानम् आसीत्।

फर्ग्युसन-महाविद्यालयोऽपि नववातावरणस्य अनुगुण एव आसीत्। तस्य स्थापनैव राष्ट्रियता-परिपोषणार्थम् आसीत् । वै. का. राजवाडे, म. म. वासुदेवशास्त्री अभ्यंकर इत्येतत्सदृशा ज्ञानदिग्गजाः तत्र प्राध्यापका आसन् । तुच्छीकृतद्रव्याणाम् एतेषां स्वार्थत्यागो नाम अपरो विशेषः, यस्य रॅङ्ग्लर र. पु. परांजपे इत्येतद् एकं निदर्शनम् । तदानीम् अचिर-प्राप्त-रॅङ्ग्लरोपाधिकैर् एतैः सहजलभ्यानि प्रचुरवेतनानि च सेवास्थानानि प्रत्यादिश्य फर्ग्युसन-महाविद्यालये अल्पवेतनकं प्राध्यापकत्वमेव अङ्गीकृतम्। युक्तमेव इदं यद् यत्र एतदादिकृतात् तेजोवलय-हेतोः दूरदूरतो बुद्धिप्रकर्षशालिनो विद्यार्थिनः आकृष्यन्ते स्म, तत्रैव विनायकराया अपि संप्राप्ताः ।

महाविद्यालयं प्रविष्टैः सावरकरैः शीघ्रमेव निश्चितः दैनिको जीवितक्रमः । विद्यार्थिसुलभो हि सायंतनः साङ्घिकः पादचारः। सावरकरैस्तु परिहृतैतन्मोहैः समयोऽयम् इतरवाचनार्थं नियुक्तः । न हि ते साधारणविद्यार्थिवत् परीक्षैकलक्ष्या आसन् । तत्तद्देशानाम् इतिहासाः, तत्रत्या राज्यक्रान्तयः, राज्यशास्त्रीयाणि तत्त्वानि, विधिः (धर्मशास्त्रम्) इत्यादि बहु तेषाम् अध्ययनीयम् आसीत् । न कस्यामपि परीक्षायां विनायकरायाः सविशेषं व्यद्योतन्त । कृत-तत्तद्-अवान्तराध्ययनाः, अनुष्ठित-तत्तद्-व्यापारविशेषाश्च सावरकराः सर्वस्या अपि परीक्षायाः आत्मानं मोचयितुम् अपारयन्त इत्येव बहु मन्तव्यम् । अनेके इतिहासं-विषयका ग्रन्थाः, विशेषतः सरदेसाईनां 'रियासत' संज्ञकाः, तैः अस्मिन्नेव काले पठिताः । इटली-देशस्य इतिहासविषयकं तैः प्रदत्तम् एकं भाषणं तदानीं बहु पप्रथे । ईलियड-रामायणोपरि तैर् लिखितः तौलनिको निबन्धः तेषां प्राध्यापकस्य प्रशंसाभाजनम् अभवत् । स्थानिकेषु वृत्तपत्रेष्वपि तैर् अन्तरान्तरा लेखितुं प्रारब्धम् ।

बुद्धिविकासने दत्तचित्ताः सावरकराः शरीरसंवर्धनात् न प्रामाद्यन् । अन्यधर्मस्येव राष्ट्रधर्मस्यापि शरीरम् आद्यसाधनम् । विशेषतश्च क्रान्तिकारकाणाम् । पारम्परिक-'दण्डबैठका-' (प्रत्यहं प्रत्येकशः ३००)-दिना व्यायामेन सह तैः डम्बेल्स्-संज्ञको व्यायामोऽपि परिशीलितः । गिर्यारोहणादिकमपि च परिचितम् । जलतरणं पूर्वमेव अभ्यस्तम्

आसीत् । पादकन्दुकक्रीडायां तेषां काचिदिव रुचिरासीत्, न तु क्रीडान्तरेषु । उत्तरायुषि तांस्तान् क्रूरान् क्लेशान् अविगणय्य यत् तेषां शरीरम् अध्रियत, तत्र मनोबलमिव इयं यत्नेनाराधिता शरीरसंपदपि केनाप्यंशेन कारणम् ।

सावरकर-स्कन्धावार:

महाविद्यालये प्रविष्टानां सावरकराणां राष्ट्र-स्वतन्त्रतारूपं ध्येयम्, सशस्त्रक्रान्तिरूपं च तत्साधनं इत्येतद् द्वयं पूर्वमेव निश्चितम् आसीत् । प्रवर्तितस् तै: तस्य पुण्यपत्तनेऽपि प्रसार: । संमिलितं तेषां परित: श्री. वि. म. भट, थत्ते, दाजीसाहेब आपटे प्रभृति मित्रमण्डलम् । मित्रमण्डलमिदं तदानीं 'सावरकर-स्कन्धावार: ' इत्याख्याम् अन्येषु छात्रेषु भेजे ! अस्य मण्डलस्य साप्ताहिक्य: सभा: कदाचित् छात्रावासे, कदाचित् तु पर्वतीपर्वतकस्य फर्ग्युसनपर्वतकस्य वा पाददेशे रहसि भवन्ति स्म । अन्तरान्तरा लोकमान्यै:, तथा च परांजपे-महोदयैरपि सह समागम्य एतेन मण्डलेन विचारविनिमय: अक्रियत । सिंहगडसदृशानाम् ऐतिहासिकानां स्थलानां यात्रा अपि कार्यकलापान्तर्भूता आसन् ।

स्वाध्याय:, तथा च मतप्रचार-जनसंघटनात्मकं द्विविधं राष्ट्रकार्यम्, इत्येतद्-द्वयेन सह तत्कालिकस्य सावरकरजीवितस्य तृतीयो महत्त्वपूर्णोऽशो नाम साहित्यनिर्मिति: । इदानीं भूयसि भागे नष्टे सत्यपि यद् अवशिष्यते तत् तदानींतनस्य सावरकरसाहित्यस्य पर्याप्तं प्रातिनिध्यं करोति ।

छात्रावासप्रवेशोत्तरं कतिपयैरेव दिनै: तै: शिव-छत्रपते: आरत्रिकं विरचितम्, यत् तदानीं प्रतिशुक्रवासरं संघश: पठ्यते स्म । देवतानां 'सन्ता'नां वा आरत्रिकं गीयते; शिवाजि-सदृशस्य राष्ट्रियवीरस्य आरत्रिकं तु मन्ये सावरकरोपज्ञमेव भवेत् । 'वृषोक्ति' इत्याख्यायां कवितायां केनचिद् हिन्दुना धूर्वहणदास्यार्थं निन्दितो वृष: तं हिन्दुं तस्य ततोऽपि भीषणतरं पारतन्त्र्यदास्यं स्मारयति । 'विधवांची दु:खें' इत्याख्यायां कवितायां विधवानां पुनर्विवाह: कविना पुरस्कृतोऽस्ति । 'विश्वांत आजवरि शाश्वत काय झाले ?' (किं नाम शाश्वतमभूद् भुवनेऽद्ययावत्) इत्याख्यं काव्यम् अदृष्टसूर्यास्तस्यापि आङ्ग्लसाम्राज्यस्य अवश्यं-

भाविनम् अन्तं सूचयितुम्, अङ्गमोचनपरां च भारतीयजनतां समाश्वासयितुं प्रणीतमस्ति । एतत्कालिक्यां सावरकर-रचनायां तु त्रीणि काव्यानि सुविदितानि सन्ति—'स्वतन्त्रतेचें स्तोत्र' (स्वतन्त्रतास्तोत्रमपि सावरकरोपज्ञम् !), द्वे च वीरगाथे, 'सिंहगडचा पोवाडा', 'बाजीप्रभूचा पोवाडा' इत्याख्ये ।

स्वतन्त्रतास्तोत्रस्य प्रारम्भिकं चरणद्वयं संस्कृतम् एव वर्तते—

जयोऽस्तु ते श्रीमहन्मङ्गले ! शिवास्पदे, शुभदे ।
स्वतन्त्रते भगवति ! त्वामहं यशोयुतां वन्दे ।।

भास्करस्य भास्वरता, उदधेर् गाम्भीर्यम् इत्यादीनां, नहि नहि साक्षात् परब्रह्मणोऽपि भगवत्या स्वतन्त्रतया अभेदं कल्पयित्वा मातृभूमेः स्वातन्त्र्यसंपादनेनैव जीवितस्य कृतार्थतां कविः प्रतिपादयति—

यत् त्वदर्थमरणं, जननम्
त्वां विना जन्म, तन् मरणम्

भगवतीं स्वतन्त्रतां यथा कविः अर्चयति, तथैव निजप्राणपुष्पैः कृततत्पूजनौ शिवभूपतेः सहचरभूतौ द्वौ स्वातन्त्र्यवीर-धौरेयौ अपि स वन्दते—सिंहगड-वीरगाथायां तानाजिम्, बाजिप्रभु-वीरगाथायां च बाजिप्रभुम् । अनावश्यकं तयोरत्र चरितं वर्णयितुम्, ययोर्हि आकुमारं यशो वर्तते । 'देशार्थ जनन आपुले' (देशार्थम् हि अस्मज्जन्म) इति सावरकराणां जीवितस्य स्थायिभावः अत्रापि तानाजिमुखेन प्रस्फुटति । प्रार्थयते चासौ

देशार्थ पडो द्या काया । जाईल नातरी वाया

(देशार्थं पतत्वेष कायः, अन्यथा निष्फल एव सः)

बाजिप्रभु-गाथायाः प्रारम्भिकी वीरवन्दना चितोडगडे हुतजीवितानां रजपूत-वीराङ्गनानां, प्रतापसिंहस्य च वन्दनेन प्रारब्धाऽस्ति । या हि हिन्दुराष्ट्रस्य एकात्मतायाः तदानीमपि सावरकरमनसि दृढमूलायाः परिचायिकाऽस्ति । 'शठं प्रति शाठ्यम्' इति यत् सावरकरनीतेः मूलभूतं सूत्रम् तदपि अस्यां वीरगाथायां प्रसङ्गवशात् दृष्टिगोचरं भवति । यवनरिपोः वञ्चनापूर्वकं शिवरायस्य पलायनं कविः एवं समर्थयति—

अब्रह्मण्यं यात काय रे दोष कोणता तो ।
आला ठक ठकवाया उलटा भला ठकवि त्या तो ।।
साप त्रिखारी देशजननिचा ये घ्याया चावा ।
अवचित गांठुनि ठकवुनि भुलवुनि कसाहि ठेचावा ।।

(वञ्चनार्थमेव आगतं शठं यदि सज्जनः वञ्चयेत्, किमत्र 'अब्रह्मण्यम्'? मातृभूमिं दंष्टुमागतस्य कृष्णसर्पस्य यथाकथमपि कुट्टनमेव प्रतिक्रिया– तम् अतर्कितम् आसाद्य वा, वञ्चयित्वा वा, मोहयित्वा वा ।)

विदेशीय-वस्त्र-होलिका

सावरकराणाम् एतादृशाः व्यापाराः एकतः अग्रतःसराः आसन्, अन्यतश्च वर्धिष्णुतापम् आसीत् राजकीयं वातावरणम् । वङ्गभङ्ग-प्रस्तावस्य कारणात् आसेतुहिमाचलम् उच्छलिता आसीत् असंतोषस्य लहरी । विभाजन-प्रतिघात-हेतुना वङ्गीयैर् यद् आन्दोलनं प्रारब्धम्, तत्र महाराष्ट्रिया अपि सहभागिनोऽभवन् । विदेशीय-वस्तु-बहिष्कारः स्वदेशीयपुरस्कारश्च इत्येतत् प्रधानम् अङ्गमासीत् अस्य आन्दोलनस्य । १९०५ खिस्ताब्दे अनेन आन्दोलनेन तीव्रं स्वरूपम् आस्थितम् । पूर्वस्मिन्नेव वर्षे (१९०४) मित्र-मेलापकशाखानां 'अभिनवभारत' नाम्ना एकत्रीकरणं सावरकरैर् अनुष्ठितम् आसीत् । तेऽप्यधुना स्वदेशीयान्दोलने संमिलिता अभवन् ।

'**उत्कट भव्य तेचि घ्यावें । मिळमिळीत अवघे टाकावे**' इति हि सावरकराणां स्वभावः । एतत्-स्वभावानुरूपमेव विदेशीय-बहिष्कार-प्रचारार्थम् आयोजितायां सभायां तैरेकः अभिनवः प्रस्तावः कृतः । तैः सूचितं यद् विदेशीयवस्त्राणाम् एका 'होलिका' (सामारम्भिकं दहनम्) कर्तव्या इति । सावरकर-प्रभृतीनां यूनां सिद्धतां जिज्ञासमानैः लोकमान्यैः 'न्यूनतोन्यूनं शकटार्धशकटं वस्त्राणां चेत् संचीयेत, होलिका क्रियताम्' इति समयपूर्वकम् अनुमतम् । होलिकार्थं विजयादशमी निश्चिता । विदेशीयवस्त्रशकटस्य यदा उत्सवयात्रा प्रवर्तिता तदा टिळक-परांजपे-(भालाकार) भोपटकरप्रभृतयो ज्येष्ठनेतारः तत्र युवभिः सह स्कन्धास्कन्धि समभिलन् । अन्ते च वस्त्राणां होलिका कृता ।

प्रसङ्गेऽस्मिन् होलिकानुरूपाणि तेजस्वीनि भाषणान्यपि अभूवन्, यत्र रक्तगतनाटचैः शिवरामपन्तैः वस्त्रराशितः एकम् अदग्धं वस्त्रं गृहीत्वा 'न जाने कियत् भारतीयं द्रव्यम् अनेन वस्त्रेण आङ्ग्लभूमिम् अपहृत्य नीतम् । ईदृशं पापवस्त्रम् अहम् अग्निनारायणाय समर्पयामि ' इत्युक्त्वा उज्ज्वलज्ज्वालायां होलिकायां तत् सावेशं प्रक्षिप्तम् !

विजयादशम्याम् इदम् अभिनवं सीमोल्लङ्घनं कृतवतां सावरकराणाम् तत्फलस्वरूपम् अन्यदपि सीमोल्लङ्घनं कर्तव्यम् अभवत्—छात्रावाससीमोल्लङ्घनम् । होलिकावृत्तान्तं विदित्वा जातरोषैर् महाविद्यालयाधिकारिभिः सावरकराः दश रूप्यकाणि दण्डिताः, छात्रावासाच्च निष्कासिताः । छात्रावासस् तावत् तैः आज्ञानुरूपं सपद्येव परित्यक्तः । दण्डार्थं तु तेषां न स्वीयं द्रव्यं व्ययीकर्तव्यम् अभूत् । विदितदण्डवृत्तान्तैर् विद्यार्थिभिः स्वयमेव निधिः संचितः । लोकमान्यैरपि केसरिणि 'नैव एते अस्माकं गुरवः' इत्याख्यान् द्वित्रान् लेखान् लिखित्वा विद्यालयाधिकारिणः कठोरं निर्भर्त्सिताः ।

अधुना बी. ए. परीक्षा समीपवर्तिनी आसीत् । अतः व्यापारान्तराणि परित्यज्य सावरकरा अध्ययन एव दत्तचित्ताः अभवन् । उत्तीर्णा च तैः सा परीक्षा (२१–१२–१९०५)। परीक्षोत्तरम् अनेकान् ग्रामान् गत्वा तैः तत्र तत्र स्वदेशीयपुरस्कारः कृतः तदनन्तरं च ते एल्‌एल्. बी. परीक्षाया अध्ययनार्थं मुम्बापुरीं गत्वा (जानुअरी १९०६) कांश्चिन् मासान् तत्रैव अवसन् । तत्र निवसतां च तेषां विदेशयात्रायोगः समायातः, यत्र निमित्तम् अभवन् विख्याता देशभक्तपण्डिताः

श्यामजी कृष्णवर्माणः ।

एते कृष्णवर्माणः तीव्रमतवादिनः आसन् । अननुकूलं भारतं तीव्राणां राजकीयमतानां प्रचारस्य, आङ्ग्लभूमिस्तु स्वातन्त्र्यप्रियतया किंचिदिव तदनुकूला इति मत्वा प्रागेव ते भारतं विहाय आङ्ग्लभूमिं गता आसन् । तत्र च तैः भारतीय-स्वातन्त्र्यान्दोलनस्य प्रचारार्थं 'इण्डियन् सोशिऑलजिस्ट ' इत्याख्यं मासिकपत्रं निष्कासितम् आसीत्, संस्थापिता चासीत् 'इण्डियन् होमरूल सोसायटी ' नाम संस्था । स्वातन्त्र्यवादिनो भारतीययुवकाः आङ्ग्लभूमिम् आगच्छन्तु, आधुनिकेन

राजकीयेन तत्त्वज्ञानेन आचारेण च परिचिता भवन्तु इत्येतदर्थं तान् प्रोत्साहयितुं ते अन्तरान्तरा छात्रवृत्तिप्रदानमपि उद्घोषयन्ति स्म। एतादृशानां तत्रागतानां भारतीयानां कृते निवासार्थं तैः एकं 'भारत-भवनम्' अपि लण्डन-नगरे निर्मितमासीत्। तत्र च तदानीम् आङ्ग्ल-भूमौ वर्तमानानाम् भाई परमानन्दः, लाला हरदयालः, श्रीमती कामा, सेनापति-बापट, इत्यादीनां भूयान् गमनागमनप्रचारः आसीत्। स्वातन्त्र्य-वादिनां 'भारतभवनम्' नाम आङ्ग्लभूमिगतं केन्द्रमिव आसीत्।

स्वप्न-जागरयोः राष्ट्रस्वातन्त्र्यम्

एतां निजपरिपाटीम् अनुसृत्य १९०६ ख्रिस्ताब्देऽपि कृष्णवर्मभिः छात्रवृत्ति-प्रदानेच्छा निजे 'इण्डियन सोशिऑलजिस्ट' पत्रे प्रकटीकृता। तदर्थं द्रव्यं बॅ. सरदारसिङ्ग राणा-महोदयैः प्रदित्सितम् आसीत्। तं वृत्तान्तं पठित्वा सावरकरैः तल्लाभे प्रयतितुं निर्णीतम्। लोकमान्यैः तथा च परांजपे-शिवरामपन्तैः प्रशस्तिपत्रे प्रदत्ते। स्वीये प्रार्थनापत्रे सावरकरैः यदेकं वाक्यं लिखितमस्ति 'बाल्यात् प्रभृति अद्ययावत् मया एकमेव वस्तु स्वप्ने दृश्यते, जागरे च चिन्त्यते, तन्नाम नष्टस्य राष्ट्र-स्वातन्त्र्यस्य पुनःप्राप्तिः' इति, 'भूतार्थव्याहृतिः सा हि न (आत्म)स्तुतिः' इत्येव सर्वोऽपि सचेता मन्येत। सार्धशताद् अधिकेषु इच्छुकेषु सावरकराः तां छात्रवृत्तिम् अलभन्त। आवश्यकस्य अधिकद्रव्यस्य प्रदानभारे श्वशुरेण सानन्दं स्वीकृते सावरकराः ९–६–१९०६ दिने आङ्ग्लभूमिं गन्तुं 'पर्शिया'ख्यां नौकाम् आरोहन्।

अस्मिन्नेव जलप्रवासे नौतले पादचारसमये रात्रौ उपरि विस्तीर्णः तारकाराशिं प्रेक्ष्य सावरकराणां मनसि एका कविता स्फुरिता, यस्या नामास्ति 'तारकांस पाहून' (तारकादर्शनोत्तरम्) इति। सावरकरी-यस्य अनिरुद्धस्य कल्पनाविलासस्य, तत्त्वजिज्ञासायाश्च परिचयार्थम् इयं कविता अवश्यं पठनीया।

जुलै-मासस्य प्रारम्भे सावरकरैः आङ्ग्लभूम्यां पदन्यासः कृतः।

* * *

४. शत्रुशिबिरे (पूर्वार्धम्)

सावरकरा: आङ्ग्लभूमिं गता:; आपातत: बॅरिस्टर-पदवीम् अधिगन्तुम् । वस्तुतस्तु स्वातन्त्र्यान्दोलनं तत्रापि प्रसारयितुम् । तदर्थं जनान् संघटयितुम् । साधनसंभारं संपादयितुम् । स एव ग्रामस् तेषां गन्तव्य आसीत् । बॅरिस्टर-पदवीलाभस्तु तृणस्पर्शायमान: ।

श्यामजी–कृष्णवर्मणां भारतभवन एव ते अवसन् । तदानीं तत्तद्-विद्याध्ययनार्थम् अनेके भारतीया विद्यार्थिन: तत्रागता आसन् । तेषु बहव: सावरकराणां तेन तेन गुणविशेषेण जातादरा: क्रमेण सावरकर-परित: समभिलन्, यन्मध्ये सेनापति बापट, लाला हरदयाल:, मदनलाल धिंग्रा, व्ही. व्ही. एस्. अय्यर, ग्यानचन्द वर्मा इत्यादय: प्रधाना आसन् । तेषां मध्ये केचन प्रागेव राष्ट्रस्वातन्त्र्यं प्रति दत्तचित्ता आसन् । केषांचिच्च मनसि राष्ट्रभक्ति: सावरकराणां संपर्कवशात् जजागार । श्री. अय्यराणां निदर्शनमेव अत्र पर्याप्तम् । नवागतैस् तै: आङ्ग्ल-पद्धतिकं नृत्यगायनादिकं परिचेतुं चिन्तितम् आसीत् । सावरकराणां तु 'अयुक्तम् अत: परं तारुण्यसुलभाम् उत्साहसंपदम् ईदृशेषु क्षुल्लकेषु व्यापारेषु व्यर्थीकर्तुम् । सन्ति अस्माकं महत्त्वभाञ्जि कर्तव्यानि' इत्यादिभि: सावेशैर् वाक्यै: परित्यक्ततद्विचारास् ते क्रमेण सावरकराणां नेतृत्वम् अङ्गीचक्रु: ।

सावरकराणां मनसि इटालीयं देशभक्तं मॅझिनिनामकं प्रति अतीव भक्ति: आसीत् । लण्डन-नगरे आगमनाद् ऊर्ध्वं कतिपयैरेव दिनै: सावरकरै: अस्य इटलीदेशस्य मुक्तिकर्तु: आत्मचरितं मद्देशबान्धवानां स्फूर्तिकरं भवेत् इति बुद्ध्या तस्य मराठीभाषायाम् अनुवाद: प्रारब्ध:, द्वित्रैरेव मासै: समाप्तश्च स: मुद्रणार्थं भारते प्रेषित: । अतीव लोकप्रियतां गतोऽयं ग्रन्थ:, तस्य च देवताप्रतिमाया इव शिबिकायात्रा प्रवर्तिता आसीत् इति ह कथयन्ति वृद्धा: । तस्य सावरकरै: लिखिता षड्-विंशतिपृष्ठात्मिका प्रस्तावना तावद् अनेकै: कण्ठस्थीकृता । एतत् ग्रन्थ-समाप्त्युत्तरम् अचिरेणैव सावरकरै: १८५७ ख्रिस्ताब्दीयं स्वातन्त्र्य-समरम् अधिकृत्य ग्रन्थलेखनं प्रारब्धम् ।

'काळ' पत्राय वार्तापत्रप्रेषणम् इत्ययमपि आसीत् सावरकराणां तदानींतनः नियतव्यापारः। समीपतः साक्षात्कृतानां युरोपीय-घटनानां मर्माविष्करणं स्वत्वनिष्ठया बुद्ध्या सावरकराः एतेषु वार्तापत्रेषु कुर्वन्ति स्म। एष्वेव दिनेषु आफ्रिकीयस्य स्वातन्त्र्यान्दोलनस्य प्रचारार्थं गान्धि-महात्मानः तत्र प्राप्ताः। भारतभवनमपि ते नैकदा गच्छन्ति स्म। तत्र च 'सत्याग्रहो वा सशस्त्रः प्रतिकारो वा' इति विषयम् अधिकृत्य महात्मनां सावरकरादिभिः सह वादः संजातः इति तर्कयितुं शक्यम्। यतः सावरकराणां तदानींतनेषु अनेकेषु वार्तापत्रेषु अयं विषयः पौनःपुन्येन आवर्तते। दारिद्र्यहतस्य सामान्यजनस्य कार्त्स्न्येन शासनेन साकम् असहकारासंभवात्, शासनं नियमानुसारेणैव वर्तेत इति निश्चित्यभावाच्च निष्फलो भवति निःशस्त्रप्रतिकारः इति सावरकरमतानां निष्कर्षः। अन्यतमे वार्तापत्रे परराष्ट्रियाणां सहानुभूतिं स्वीकृत्यापि स्वावलम्बनस्य माहात्म्यम् एवम् उपदिशन्ति सावरकराः—

> स्वीकुरुष्व सहानुभूतिम्, अयाचमानः। याहि भोजनाय, सत्कृत्य निमन्त्रितः।... कुरुष्व पौरुषम्। स्वयम् उत्पादय सस्यम्। दिष्ट्या लब्धास्ति त्वया देवदत्ता भारती-सदृशी भूमिः। सन्ति चात्र देवखाताः गङ्गा-यमुना-सिन्धु-कावेरी-सदृशाः कुल्याः। अत्र तव पूर्वपुरुषैर् न केवलं सस्यं निष्पादितम्, अपि तु साक्षात् सुवर्णम्।...त्वमेव चेत् अत्र कृषिं कृषिष्यसे, सुवर्णम् उत्पत्स्यते। यदि तु परकीयो हलः इमां भूमिं स्पृशेत्, अत्र प्लेग उत्पत्स्यते, दुष्कालः उत्पत्स्यते, पारतन्त्र्यम् उत्पत्स्यते।...अयम् एको देवसमयः यदि त्वया परिपालितः, तर्हि वृष्टिर् भवतु मा वा भवतु, अस्यां दिव्यभूमौ कोहिनूरा उत्पत्स्यन्ते, मयूरासनानि उत्पत्स्यन्ते, कालिदासा उत्पत्स्यन्ते, शिवच्छत्रपतयश्च उत्पत्स्यन्ते।

'अभिनव-भारत' प्रचारः सावरकरैः आङ्ग्लभूमावपि प्रारब्धः। प्रारब्धाश्च साप्ताहिक्यः सभाः। 'फ्री इण्डिया सोसायटी' नाम संस्थापि एष्वेव दिनेषु स्थापिता। अभिनवभारतस्य इदं प्रकटम् अङ्गम् आसीत्। क्रान्तिकारकाणां बौद्धिकं प्रशिक्षणम् अस्याः अन्यतमं परं मुख्यं कार्यम् आसीत्। एव नित्येषु कार्येषु प्रचलत्सु एव मे-मासस्य दशमं दिनम्

आगतम् । अस्मिन् (१९०७) वर्षे १८५७ ख्रिस्ताब्दीयस्य स्वातन्त्र्य-युद्धस्य ५० वर्षाणि संवृत्तानि इति तस्य स्मृतिः सावरकर-प्रभृतिभिः सोत्सवं संमानिता। अग्रिमे वर्षे (१९०८) इतोऽपि महत्या मात्रया स्वातन्त्र्ययुद्ध-वार्षिकदिनोत्सवः अनुष्ठितः। १९०७ ख्रिस्ताब्दे स्वातन्त्र्य-युद्धस्य अर्धशताब्दपूर्तिः अलक्षिता न व्यतीता इत्येव विशेषः ।

युरोपे तत्तद्देशेषु स्थितैः तत्तद्देशीयैः क्रान्तिकारकैः सह संपर्क-साधनमपि आङ्ग्लभूमिस्थितानां भारतीय-क्रान्तिकारकाणाम् उद्दिष्टम् आसीत्। स्वातन्त्र्ययुद्ध-अर्धशताब्दोत्तरं कतिपयैरेव अहोभिः फरान्स-स्थितैः रूसीयैः क्रान्तिकारकैः सह संधाय तेभ्यो बॉम्बविद्याधिगमार्थं सेनापति-बापटाः पॅरिस-नगरीं प्रस्थिताः। ऑगस्ट-मासे स्टुटगार्ट-नगरे एका 'सोशालिस्ट कॉङ्ग्रेस्' संमिलिता, यत्र 'अभिनव-भारत'स्य अन्यतमा सदस्या श्रीमती कामा भारतीय प्रतिनिधित्वेन सहभागिनी अभवत्, तस्यां च परिषदि स्वतन्त्रभारतस्य ध्वजम् इदंप्रथमतया उदश्रयत्। अत्रान्तरे कयाचिद् जातपरिचयया रूसीयया तरुण्या आङ्ग्लभाषया अनूदितां बॉम्बविद्यापुस्तिकां गृहीत्वा सेनापतयः आङ्ग्लभूमिं प्रति निवृत्ताः। तैर् आनीतायाः पुस्तिकायाः कतिचित् प्रतिलिपयः संजाताः, ताश्च होतीलाल-वर्मा तथा च हेमचन्द्र-दास इत्येतयोर् हस्तेन भारतस्य पन्थानम् अगृह्णन्। सकृत् बॉम्बविद्यायाम् अधिगतायाम् केचन क्रान्ति-कारकाः तत्सिद्धिदर्शनार्थम् उत्सुका अभवन्। सेनापतयस् तावत् पार्लमेण्ट-सभागृहोपरि एव बॉम्बक्षेपणाय उद्यता अभूवन्। सावरकरास्तु 'अलम् एतेन अविचारितरमणीयेन तारकापातसदृशेन व्यापारेण। तमःपर्यवसायी अयं मुहूर्तज्वालः' इत्येतदादिभिर् युक्तिवचोभिः तान् एतस्मात् साहसात् न्यवारयन् । पश्चात् तेषामेव आदेशानुसारं सेनापतयः क्रान्तेः पूर्वसिद्धतार्थं भारतं प्रतिन्यवर्तन्त ।

'भोः हुतात्मानः ! '

लण्डननगरे १९०८ ख्रिस्ताब्दे शिवाजि-जन्मोत्सवः प्रथममेव संमानितः अभूत् । तदुत्तरं च कतिपयैरेव दिनैः मे मासस्य दशमो दिवसः संप्राप्तः। महता वैभवेन संमानितमिदं स्वातन्त्र्यसमरस्य वर्धापनदिनं महतीं ख्यातिम् अवाप । राज्ञी लक्ष्मीः, बहाद्दूरशाह, कुंवरसिंह,

नानासाहेब इत्यादीनां गुणसंकीर्तनम् अभवत् । १० मे-तः १० जून पर्यन्तं 'तपस्यामास' पालनं निश्चितम्, यस्मिन् केनचित् धूम्रपानं परित्यक्तं, केनचिच्च मद्यपानम्; केनचिच्च उपवासः कृतः, एवं च संचितं वित्तं सर्वैः ५७ वर्षीय-क्रान्तिकारकाणां स्मृतिनिधये प्रदत्तम् । अस्मिन् अवसरे प्रकाशितम् 'भोः हुतात्मानः !' इत्याख्यं पत्रकम् अत्र अवश्यं निर्देशम् अर्हति । पत्रकेऽस्मिन् उपरिनिर्दिष्टेभ्यः स्वातन्त्र्यसमरवीरेभ्यः वन्दना-पूर्वकं कृतज्ञतापुरःसरं च एवं प्रतिज्ञातम् आसीत्, यद् युष्माकं कार्यं वयम् अग्रतःसरं करिष्यामहे, युष्माकं रक्तपातस्य च निष्कृतिं संपाद-यिष्यामहे । '१८५७ खिरस्ताब्दे मे-मासस्य दशमे दिने प्रारब्धं युद्धम् अद्य १९०८ वर्षस्य मे-मासीये दशमदिनेऽपि नास्ति विरतम्, न च तावत्कालपर्यन्तं विरंस्यति यावत् कश्चिद् अपरो मे-मासीयो दशमदिवसः आगमिष्यति, यदा भारतशिरसि स्फुरत्प्रभामण्डलो मुकुटो देदीप्यमानस् तिष्ठेत्, स्वातन्त्र्यस्य वा, हौतात्म्यस्य वा'। अस्य पत्रकस्य कतिचन प्रतिलिपयः भारताय अपि निभृतं प्रेषिताः, याश्च दैववशात् शासकीया-धिकारिणां हस्ताभ्यासम् उपगताः सत्यः अनल्पं संभ्रमम् उदपादयन् ।

क्रान्तिकारकाणां भगवद्गीता

एतावता कालेन पूर्वनिर्दिष्टं सावरकराणां ५७ वर्षीयस्य स्वातन्त्र्य-समरस्य इतिहासलेखनम् समाप्तम् आसीत् । तदिदानीं तैः हस्तलिखितं मुद्रणार्थं भारते प्रेषितम् । भारते तु न कोऽपि मुद्रकः ज्वलन्तमिमम् अङ्गारं स्प्रष्टुम् उदसहत । भारते तत्र तत्र बहुगतागतोत्तरं पुनरपि तद् हस्तलिखितं सावरकरेभ्यः प्रतिप्रेषितम् । ततः आङ्ग्लभूम्यामेव तस्य मुद्रणं कर्तव्यम् इति निर्णये जाते मराठीभाषामयः स ग्रन्थः श्री. वामन-राव फडके तथा च श्री. कोरेगावकर इत्येताभ्याम् आङ्ग्लचा अनूदितः । अनुवादकर्मणि स्वयं सावरकरा अपि अंशभाजः आसन् । तम् आङ्ग्लानु-वादमपि न कोऽपि तत्रत्यो मुद्रकः प्लेगहतमिव मूषकं संदंशकेनापि स्प्रष्टुमैच्छत् । अन्ते कस्यचित् शार्मण्यस्य माध्यस्थ्यवशात् हॉलण्ड-देशे अस्य ग्रन्थस्य मुद्रणम् अभवत् । अत्रान्तरे चारचक्षुषा भारत-शासनेन एतं ग्रन्थमुद्रणवृत्तान्तं विदित्वा यन्त्रस्थावस्थस्य अप्रकाशितस्यापि अस्य ग्रन्थस्य भारतानयनं निषेधयित्री आज्ञा उद्घोषिता । शाठ्यविषये

भारतशासनस्य भुक्तश्राद्धैः क्रान्तिकारकैस्तु शेक्सपियरस्य नाटकानां, पिक्विक् पेपर्स इत्यादीनां ग्रन्थानां च मुखपत्रवेष्टनैः स्वातन्त्र्यसमरग्रन्थम् अवगुण्ठयित्वा तस्य भारतं प्रति प्रेषणे साफल्यं संपादितमेव।

सावरकराणाम् अयं ग्रन्थः क्रान्तिकारकाणां भगवद्गीतायते। तदानींपर्यन्तं सैनिकविद्रोहमात्रतया संभावितं ५७ वर्षीयम् उत्थानं सावरकरैः इदंप्रथमतया स्वातन्त्र्ययुद्धे परिणमितम्। ग्रन्थरत्नेन अनेन आयत्यामपि क्रान्तिकारकदिग्गजाः प्रकाशकतया लब्धाः। प्रथम-महायुद्धावसरे लाला-हरदयालैः अस्य आवृत्तिः प्रकाशिता। १९२७–२८ खिस्ताब्दयोः हुतात्मवर्येण भगतसिंहेन अस्य तृतीयावृत्तिः प्रकाशिता, चतुर्थावृत्तिश्च देशगौरवैः नेताजिभिः सुभाषचन्द्रैः ! अन्यासु भारतीय-भाषासु इव मराठ्यामपि अयं ग्रन्थः अनूदितोऽभवत् (अनुवादकः— प्रा. पटवर्धन)। पश्चाद् द्वितीयमहायुद्धोत्तरं भाग्यवशात् मूलभूतो मराठी-ग्रन्थोऽपि उपलब्धः, स च अधुना अचिरप्रकाशिते समग्र-सावरकरवाङ्मये विराजमानः तिष्ठति।

अस्मिन्नेव काले भारते राजकीयेन आन्दोलनेन तीव्रं स्वरूपम् आस्थातुं प्रारब्धम् आसीत्, शासनेन च तीक्ष्णदण्डम्। खुदीरामप्रभृतयः वधस्तम्भम् आरोपिताः (११–८–०८)। शिवरामपन्त परांजपे सश्रमं कारावासम् अनुभाविताः (६–७–०८)। लोकमान्याः षड् वर्षाणि निर्वासिताः (२३–७–०८)। एतस्या निर्वासनाज्ञायाः उच्चतमे न्यायालये पुनर्विचारप्रार्थनार्थं खापर्डे तथा च करंदीकर इति दादासाहेब-द्वयम् आङ्ग्लभूमिम् अगमत्। बालेन सह अयुतसिद्धनामानौ लाल-पालौ अपि तदानीम् आङ्ग्लभूमौ आस्ताम्। एतस्य गुरुजनस्य वात्सल्यपूर्ण-सहवासवशात् सावरकरादीनां कश्चित् कालः सुखेन यातः स्यात्, उभयेषां वैचारिकम् आदानप्रदानं संजातं स्यात्, गुरुजनेन च सावरकरादीनां युवकानां गुणग्रहणपरं यथोचितं प्रोत्साहनं सावधानसूचनापुरःसरं कृतं स्यादिति अनुक्तमपि ज्ञातुं शक्यम्।— एष्वेव दिनेषु तदानींतनो नेपालाधिपतिः लण्डनमध्ये आसीत्। नेपालश्च एकमेव स्वतन्त्रं हिन्दु-राज्यम् विद्यते इति हेतुना क्रान्तिकारकाणाम् अभिमानस्थानम् आसीत्। 'भवद्भिः स्वातन्त्र्यान्दोलने प्राकट्येन संमिलितव्यम्, भारतीयसाम्राज्य-

किरीट: भवच्छिरसि विराजेत ' इति आवाहनपरं पत्रं धिंग्रा-मदनलालस्य रुधिरेण लिखित्वा क्रान्तिकारकैः नेपालनरेशाय प्रेषितम् । तस्मात् न किंचित् निष्पन्नम् इति त्वन्यत् ।

डिसेम्बर-मासः परिषत्-संमेलनमासः । अस्मिन् (१९०८) वर्षे लण्डने स विशेषतः तथा संपन्नः । एतासु परिषत्सु मध्ये २० डिसेम्बर-दिने संपन्ना आङ्ग्लभूमिस्थितानां भारतीयानां ' राष्ट्रिया परिषद् ' विशेषनिर्देशार्हा, यत्र भारतीयस्वराज्य-प्रस्तावः स्वीकृतः । अस्य प्रस्तावस्य समर्थनभाषणावसरे स्वातन्त्र्यस्य अग्निदिव्यतां प्रतिपादयन्तः सावरकरा अवोचन् –

> चिन्तयत प्रथमम् । तदनु एव स्वीकुरुत स्वातन्त्र्यप्रस्तावम् । प्रथमं मनश्चक्षुषा साक्षात्कुरुत कारागारस्य भित्तीः । तमोमयीः गुहाः । न्यस्यत पादम् अङ्गारराशौ । पश्यत, यदि स तथैव स्थिरः, यथा मृदु-मृदुले तूलराशौ । यद्येवम्, स्वीकुरुत स्वातन्त्र्यप्रस्तावम् । नान्यथा ।

हिन्दुसमाजपुरुषस्य युयुत्सु-अवयवतया सिक्खानां महत्त्वपूर्णं स्थानं सावरकराः सदैव जानन्ति स्म । अतः शिवजन्मोत्सववत् श्रीगुरु-गोविन्दस्यापि जन्मोत्सवः तैः २९ डिसेम्बर-दिने बिपिनचन्द्र-पालानां सभा-पतित्वे संमानितः । सिक्खध्वजोपरि लिखितानां देग-तेग-फत्ते इति शब्दानां मध्ये देगशब्दः तत्त्वार्थकः, तेगशब्दश्च खड्गार्थकः, खड्गसहितस्य तत्त्वस्यैव विजयो (फत्ते) भवति, न तद्विरहितस्य, इति श्रीगोविन्दगुरोः उपदेशस्य सारः सावरकरैः अस्यां सभायां प्रतिपादितः ।

पिस्तुलप्रेषणम्

सावरकराणां सशस्त्रक्रान्तिवादस्य इत्थं कार्य-पद्धतिः आसीत्, यद् देशे तत्र तत्र गुप्तमण्डलैः क्रान्तिविचाराः प्रसारणीयाः, शस्त्रसंग्रहः कर्तव्यः, महायुद्धादिरूपायाः अनुकूलपरिस्थितेश्च प्रतीक्षायां स्थातव्यम् । बॉम्बविद्यायाः पुस्तिकानां प्रेषणं पूर्वं निर्दिष्टम् अस्त्येव । १९०९ ख्रिस्ताब्दस्य प्रारम्भे पॅरिस-नगर्यां क्रान्तिकारकैः क्रीतानि ब्राउनिंग पिस्तुलानि भारतभवनं प्राप्तानि । भारतभवने चतुर्भुज-नामा पाचक आसीत् । सावरकरैः तं द्रव्यादिना यथाकथंचिद् वशीकृत्य तद्धस्तेन एतानि पिस्तुलानि भारते प्रेषितानि । यद्यपि एतद्-वृत्तान्तस्य घ्रातगन्धेन

भारतशासनेन नूनम् एतानि पिस्तुलानि एतान् प्रति गच्छन्ति इति बुद्ध्या गणेशपन्त सावरकराः पूर्वमेव निगृहीताः, तथापि न पिस्तुलानि अहस्ते पतितानि । अग्रे जॅक्सन-वधः येन पिस्तुलेन संजातः, तद् एतेषां चतुर्भुज-हस्तेन प्रेषितानाम् एकविंशतेः पिस्तुलानाम् अन्यतमम् आसीत् इति शासनेन अभिज्ञातम् । तदेव च पश्चात् तेषां बन्दिग्रहणे निमित्तीभूतम् ।

सावरकरादीनाम् एतादृशैर् व्यापारैः भारतभवनम् आङ्ग्लशासनस्य अक्षिगतम् अभवत् । भारतभवनं नाम कृष्णकृत्यानां कुलभवनम् इति ख्यातिः शासकीयवर्गे पप्रथे । 'उन्मार्गगामिणाम्' आङ्ग्लभूमिस्थितानां भारतीयविद्यार्थिनां सभ्यीकरणार्थं किंचित् कर्तव्यम् इति विचारः आङ्ग्लशासनमनसि क्रमेण आयातः । भारतभवनं गुप्तचराणां लक्ष्यम् अभवत् । क्रान्तिकारकैरपि स्वीया गूढपुरुषाः शासकीयेषु प्रणिधिषु निवेशिताः । एवम् उभयतः परिणायचातुर्यां प्रकटीक्रियमाणायामेव लण्डने एकः प्रचण्ड-संभ्रमकरो वृत्तान्तः घटितः । स नाम मदनलाल धिंग्रा-कृतः कर्झन-वायली-वधः । सावरकरीये जीविते अस्य वृत्तान्तस्य महत्त्वपूर्णत्वात् सोऽयम् अग्रिमेऽध्याये उपन्यस्यते ।

* * *

५. शत्रुशिबिरे (उत्तरार्धम्)

मदनलालः पञ्चाम्बुदेशीयो हिन्दुयुवकः आसीत् । बाह्यतः नृत्य-गीत-हसित-प्रियः । अभ्यन्तरे तु जाज्वल्यमान-राष्ट्रभक्तिकः, प्रगाढं धर्मनिष्ठः, तदनुरूप-तितिक्षाशाली च । एकदा तितिक्षापरीक्षार्थम् अभिनव-भारतीयैः सहकारिभिः कृतेन संततेन सूचिवेधेन मदनलालस्य हस्तात् रुधिरधारा उच्छलिता, मदनलालस्तु अविचलितमुखवर्णस् तथैव तस्थौ । अवाचिवीरेण मदनलालेन निजं कृतिवीरत्वं कर्झन-वायलीं हत्वा प्रकटीकृतम् । स प्रकारः इत्थम्—

एकदा भारतभवने साप्ताहिकी सभा प्रारब्धाऽऽसीत्। सभासंमेलनादिषु मदनलालस्य नासीत् कोऽपि रसः। रङ्गिलेन अनेन बहिःकक्षायां ध्वनिमुद्रिकाः प्रचालिताः, प्रारब्धाश्च प्रेमगीतस्य आलापाः। सभाप्रत्यूहेन अनेन किंचित्-संजातकोपाः सावरकराः बहिरागताः, तैश्च 'इतश्च त्वं हौतात्म्यवादान् वदसि, इतश्च एवं गीतालापैः सभाविघ्नं करोषि। किम् इदमेव तव हौतात्म्यम्?' इत्यादिभिः शब्दैः मदनलालः निर्भर्त्सितः। मदनलालो मर्माहतोऽभूत्। त्रपातप्तेत तेन मनसि प्रतिज्ञातं निजं हौतात्म्यं प्रदर्शयितुम्। पश्चात् सावरकरैः सह मदनलालस्य अनेकदा गूढालापाः अभवन्। लॉर्ड मोर्ले महोदयस्य कर्झन-वायली सचिव असीत्। 'उन्मार्गगामिणाम्' भारतीयविद्यार्थिनां 'सभ्यीकरण'-भारः तेन केनचिद् अंशेन अङ्गीकृत आसीत्। १-७-०९ दिने कस्मिश्चित् सार्वजनीने समारम्भे कर्झन-वायलीम् आसाद्य मदनलालः तं रिव्हॉल्वरस्य गोलिकानां बलीचकार। पश्चात्तु तेनैव शस्त्रेण आत्मानमपि हन्तुं प्रयतमानो मदनलालः जनैर् निगृहीतः, बन्दिग्राहं च गृहीतः।

निषेधं विरुणध्म्यहम्

घटनया अनया लण्डननगरी हाहाकारमयी अभवत्। वृत्तपत्रेषु संतप्ताः लेखाः आविर्भूताः। सावरकराणां निवासस्थानस्य पुरतः प्रक्षुब्ध-जनस्य निदर्शनानि (डेमॉन्स्ट्रेशन्स) अभवन् (एषु दिनेषु ते भारतभवनं परित्यज्य पाल-महोदयानां गृहे सशुल्क-अतिथित्वेन वसन्ति स्म)। निषेधसभाः संजाताः। कॅक्स्टन-हॉल इत्याख्ये स्थाने ५ जुलै दिने संपन्नायाम् अन्यतमायां निषेधसभायां सावरकराः सहकारिभिः सह उपातिष्ठन्त। दुःख-सहानुभूत्योः प्रदर्शनोत्तरं मदनलालस्य निषेधप्रस्तावः आगतः। 'कच्चित् सर्वेषाम् अविरोधेन अनुमतो ऽयं प्रस्तावः?' इत्युक्त्वा सभासमाप्तिं त्वरयति अध्यक्षमहोदये, 'न सर्वेषाम्' इति वदन्तः सावरकरा उदतिष्ठन्। स्वीयां भूमिकां स्पष्टीकुर्वतामेव तेषां शिरसि कश्चित् यथार्थनामा पामरः प्रहारम् अकरोत्। निःसृतरुधिरोत्पीडाः सावरकरास्तु तथैव उच्चैर् भाषमाणास् तस्थुः। पामरम् उद्दिश्य उद्गूरित- पिस्तुलः निजः अन्यतमः सहकारी तु तैः नेत्रसंज्ञयैव निवारितः। सभा तावत् निर्मर्यादे परिसमाप्ता।

मदनलालोपरि अभियोगः प्रारब्धः। 'भारतोपरि आङ्ग्लैः ये अत्याचाराः क्रियन्ते, यच्च भारतः शस्त्रबलेन पारतन्त्र्ये स्थाप्यते तत्प्रतिशोधरूपेण मया वायलीवधः कृतः। नास्ति मे क्षमा याचितव्या। सिद्धोऽस्मि दण्डं सोढुम्' इति तेन न्यायालये प्रतिपादितम्। १७-८-०९ दिने मदनलालः धीरोदात्तः प्रसन्नमुखः उन्नतकन्धरश्च वधस्तम्भम् आरूढः। 'मम अन्त्यसंस्कारः हिन्दुधर्मशास्त्रानुसारेण भवतु' इति तेन प्रदर्शिता इच्छा असंपूर्णैव अतिष्ठत्। तस्य देहान्तदिने तु लण्डनीयैः भारतीयैर् विद्यार्थिभिः निर्जलः उपवासः कृतः, ग्यानचंद-वर्मभिश्च दशमदिने क्षौरं कृत्वा मदनलालस्य श्राद्धमिव निर्वर्तितम्।

आकुलाः सागर! प्राणाः

अनेन वायलीवधवृत्तान्तेन सावरकराणां भूयान् मनस्तापः सोढव्योऽभवत्। तेभ्यो बॅरिस्टर-पदवीप्रदानं स्थगितम्। निवासस्थानमपि दुर्लभम् अभवत्। अनेकदा मध्यरात्रेऽपि स्थानं परित्यज्य नूतनम् अन्वेष्टव्यम् आसीत्। अस्याम् अवस्थायां २७-७-०९ दिने विश्रमार्थं वातावरण-परिवर्तनार्थं च ते समुद्रतीरवर्तिनं ब्रायटन नाम ग्रामं गताः। तत्र कदाचित् सायंकाले पादचारेण विहरतां सावरकराणां समुद्रदर्शनेन तदन्तरिता निजा मातृभूमिः तीव्रतया स्मृतिमागता। मातृभूमेर् वियोगेन प्रियजनस्मरणेन च खिन्नस्वान्तानां सावरकराणां मनसि सहसा 'सागरम् उद्दिश्य' कविता स्फुरिता, प्रवृत्ताश्च ते समकालमेव तां गुञ्जितुम्। कवितायाम् अस्याम् आत्मानं पुनरपि मातृभूमिं नेतुं कविः सागरं प्रार्थयते। करुणरमणीयायाः अस्याः कवितायाः एकमेव खण्डम् अत्र स्थालीपुलाकन्यायेन उद्ध्रियते (अग्निजा पृ. २१)–

नक्षत्राणामस्तु मालिका कामम्। भरतभू रोचते मह्यम्।
प्रासादानां सन्ति कोटयः, सन्तु। प्रियतरा कुटी मे मातुः।
अपि राज्यं मे त्याज्यं जननीहीनम्। सह तया सुखं यामि वनम्।

अलमलं मोहयित्वैवम्।
विरहेण शपेयं तुभ्यम्।
प्रियतमया सरिता सार्धम्।

यदि सरित्पते! मां नयसि न देशं मे। सागराकुलाः प्राणा मे।

गीतं गुञ्जतां सावरकराणां कपोलौ बाष्पधारया कलुषीभूतौ, रुद्धकण्ठाश्च ते असमाप्तगीता एव बालवत् रोदितुं प्रवृत्ताः। अनया कवितया प्रभावितैः रसिकधौरेयैः चन्द्रिकाकारैः अप्पाशास्त्रि-राशिवडेकरैः अस्य उत्तररूपेण एका संस्कृतकविता विरचिता आसीत् इति वृद्धानां मुखात् श्रूयते।

वायली-वधात् प्रभृति आङ्ग्लभूमिस्थितानां भारतीयानां मनसि नैराश्यमिव प्रवेष्टुं प्रारब्धम्। नासीत् तेषां प्रकटमेलनावसरः। विजया-दशमी आसन्नवर्तिनी आसीत्। भारतीय-विद्यार्थिनां धैर्यधारणार्थं तेषां संमेलनोद्देशेन सावरकरैः विजयादशम्याम् एकः समारम्भः आयोजितः, यस्य आध्यक्ष्यं महात्मगान्धिभिः स्वीकृतम्। प्रमोदनिर्मित्यर्थं खादतमोदता संपादिता। अस्मिन् प्रसङ्गे (१४–१०–१९०९) रामकथाम् उद्दिश्य सावरकरैः व्याख्यातम्। यावत्पर्यन्तं भगवान् रामः हिन्दुहृदयम् अधि-तिष्ठति, तावत्पर्यन्तम् अस्मदुद्धारः सुसंपाद्यः, रामस्तु यदि विस्मृतः तर्हि अस्माकम् आत्मैव विनष्टः स्यात् इति तैः प्रतिपादितम्।

अमरा वंशवल्ली सा .....

अस्मिन्नेव काले प्रक्षोभकं वृत्तं भारतादपि आगतम्। राजद्रोहिणो वाङ्मयस्य प्रकाशनार्थं गणेशपन्त-सावरकराणां निर्वासनदण्डः भारत-शासनेन पूर्वमेव प्रदत्तः आसीत् सोऽधुना (२१–११–१९०९) उच्च-न्यायालयेन अनुमतः। १३–११–१९०९ दिने कर्णावत्यां व्हाइसरॉयोपरि बॉम्बसदृशं किंचित् क्षिप्तम्। तत्र अयं संबद्धः इति कृत्वा सावरकराणां कनीयान् भ्राता नारायणरायः बन्दिग्राहं गृहीतः। एतदादिभिर् वृत्तान्तैः व्यथितचित्तया गणेशपन्तानां पत्न्या एकं पत्रं विलिख्य समग्रोऽयं वृत्तान्तः सावरकरेभ्यो निवेदितः। ततः भ्रातृजायायाः सान्त्वनार्थम् ओवीवृत्तबद्धं पत्रमेकं सावरकरैः प्रेषितम्। देशसेवायां सोढव्यः सर्वस्वनाशोऽपि न शोचनीयः प्रत्युत अभिनन्दनीयः इतीमं विचारं गजेन्द्रकमल-दृष्टान्तपुरः-सरम् एवं प्रत्यपादयन्त सावरकराः (**अग्निजा** पृ. २३-२४) –

कुसुमानां सहस्राणि विकसन्ति दिने दिने।
विकस्य म्लानतां यान्ति केन तद्गणनाऽऽदृता ?
शुण्डयोत्पाटितं किंतु यद् गजेन्द्रेण पङ्कजम्।

अगच्छद् बलितां विष्णोरमरं पावनं च तत् ।।

मुमुक्षुर् हिन्दुभूरद्य गजेन्द्रोऽसौ यथा पुरा ।
राममिन्दीवरश्यामं करुणं प्रार्थयत्यसौ ।।

साऽऽगच्छतु निजोद्यानं मोदतां कुसुमैः स्वकैः ।
लुत्वाऽर्पयतु पुष्पाणि श्रीरामचरणाब्जयोः ।।

धन्योऽस्माकमहो वंशः ! नूनमीशांशसंभवः ।
यल्लब्धो रामसेवायाः पुण्यलेशो विधेर्वशात् ।।

लूयन्तां सर्वपुष्पाणि सन्तु रामार्पितानि च ।
अंशतोऽपि व्रजेद्देहो नश्वरो येन सार्थताम् ।।

अमरा वंशवल्ली सा योच्छिन्ना देवकारणात् ।
आ दिगन्तात् प्रवात्यस्या विश्वमङ्गलसौरभम् ।।

स्थाने खलु प्रा. के. ना. वाटवे महोदयाः दीपशिखा-कालिदासः, घण्टा-माघः इत्यादि प्राचीनपरिपाटीम् अनुसृत्य अत्रनिबद्धदृष्टान्तकारणात् गजेन्द्र-कमल-सावरकराः इति वदन्तः महाकविमिमं संमानयन्ति ।

वृणुत, भोः सामन्ताः !

कालेऽस्मिन् येन तेन मार्गेण भारताय शस्त्राणां पुस्तक-पत्रकाणां च प्रेषणम् स्वातन्त्र्योत्तेजक-साहित्यस्य लेखनं च इत्युभयविधोऽपि सावरकर-व्यापारः मार्गगामी आसीत् । सिक्खानाम् इतिहासस्य लेखनं तैः प्रारब्धम् । अस्मिन्नेव काले स्वातन्त्र्यान्दोलनस्य दमनकर्मणि संस्थानाधिपतीनां (सामन्तानाम्) सहकार्यं भारतशासनेन प्रार्थितम् । अतः आङ्गलभूमिस्थितैः भारतीय-क्रान्तिकारकैरपि ‘ सामन्ताः स्वातन्त्र्यान्दोलने संमिलन्तु । न्यूनतोन्यूनं तटस्थाः तिष्ठन्तु । यदि तु ते शासनस्य साहाय्यं करिष्यन्ति, कठोरो दण्डस् तेषां भोक्तव्यो भवेत् । अस्य राष्ट्रस्य प्रथमे जन्मदातारो वा भवत, अन्तिमाः पीडका वा भवत । किमिष्यते ? वृणुत, भोः सामन्ताः ! ’ इत्याशयकं तीक्ष्णं पत्रकं निष्कासितम् । एवम् उभयतः कृतप्रतिकृतयोः प्रवर्तमानयोः भारते पुनरपि एको महान् स्फोटोऽभवत् । स नाम कान्हेरे-अनन्तेन कृतः जॅक्सननाम्नः नासिक्य-मण्डलाधिपतेर् वधः ।

गणेशपन्त-सावरकराणां द्वीपान्तरनिर्वासनेन, अन्यैश्च शासकीयैर् अत्याचारैः महाराष्ट्रीयः– विशेषतः नासिक्यगतः – क्रान्तिकारकवर्गः संतप्त आसीत्। अचिरमेव सावरकर-प्रेषितानि पिस्तुलानि तेषां हस्तगतानि आसन्। मदनलालकृतः वायलीवधः तेषां स्मृतौ प्रत्यग्र आसीत्। मदनलालेन स्वीयो भागो निर्व्यूढः, अस्माभिस्तु प्रतिशोधरूपेण न किंचित् अपि कृतम् इति आत्मनिन्दारूपिणी काचित् रुहरुहिका तेषां मनसि कृतमूला स्यात्। अभिनवभारतीयस्य आन्दोलनस्य दमनार्थं १९०७ खिस्ताब्दे विशिष्य नासिक्ये प्रेषितः अयं मुखमधुर् हृदयविषः मण्डलाधिपतिः अधुना कृतकृत्यंमन्यः स्थानान्तरगमी आसीत्। स तथा मा गमत् इति क्रान्तिकारकैर् निश्चितम्। २१–१२–१९०९ दिने 'शारदा' नाटकस्य प्रयोगावसरे 'विजयानन्द' नाटचगृहे अनन्त-कान्हेरे तं यमसदनं प्रेषितवान्। तदनु मदनलाल इव आत्महत्यार्थं प्रयतमानः अनन्तः जनैर् निगृहीतः, अन्ततश्च १९–४–१९१० दिने कर्वे-देशपाण्डे-इत्याख्याभ्यां सहकारिभ्यां सह स वधस्तम्भम् आलिङ्गितवान्।

जॅक्सन-वधवृत्तान्ते अन्वीक्षणोत्तरं शासनेन अभिज्ञातम्, यत् घातुकं पिस्तुलं लण्डनस्थ-सावरकर-सकाशात् आगतम्। यतोऽयं शस्त्रप्रेषकः, अतः वधस्य सूत्रधारः अपि अयमेव इति तर्कदुष्टं निर्णीय सावरकरः भारते आनाय्य दण्डनीयः इति भारतशासनं कृतमति अभूत्। एतद् उत्प्रेक्षमाणैरपि सावरकरैः पॅरिसतः प्रकाश्यमाने स्वीये 'तलवार'-आख्ये नियतकालिके नासिकीयं हुतात्मानम् उद्दिश्य लेखलेखनेन स्वीयः तद्गतः आदरः प्रकटीकृतः।

१९०९ ख्रिस्ताब्दस्य समाप्तौ आसन्नायां सावरकराः डबल-न्युमोनिया- रोगेण आक्रान्ता अभवन्। चिकित्सार्थं ते डॉ. मुथु इत्येतेषां रुग्णालये प्रवेशिताः। स्निग्धमनस्कस्य अस्य चिकित्सकस्य रुग्णालये ते कतिचित् दिनानि स्थिताः। तत्र च तस्यैव अनुज्ञां यथाकथंचिद् आसाद्य प्रत्यहं होराद्वयं लेखनकर्म कृत्वा पूर्वारब्धं सिक्खेतिहास-लेखनं तैः समापितम्। पश्चाच्च स्थानपरिवर्तनार्थं तैः फरान्सदेशं प्रति गन्तव्यम् इति वैद्यसूचनां सुहृदनुमोदिताम् अनुमान्य ते १९१० ख्रिस्ताब्दस्य जानुअरी-मासे पॅरिसनगरीं गताः, तत्र च मास द्वयप्रायं कालम् उषिताः। तत्र च

अस्य ग्रन्थस्य संस्करणम् अनुष्ठाय तस्य तिस्रः प्रतिलिपयः तैः कारिताः, ताश्च तेन तेन हस्तेन भारताय प्रेषिताः। दुर्भाग्यवशात्तु तिस्रोऽपि ता नष्टाः ! हा हन्त ! मुषितं जगत् !

एतद्-ग्रन्थेन सह सावरकराणाम् एका कौटुम्बिकी स्मृतिः निगडिता अस्ति। अतः साऽत्र लिख्यते। सावरकराणां विदेशगमनात् पूर्वम् १९०५ ख्रिस्ताब्दे प्रभाकरो नाम तेषां सुतः जात आसीत्। सावरकराणां कार्यान्तरशत-व्यापृतत्वाद्वा लज्जानियन्त्रितत्वाद्वा अलब्ध-पितृवात्सल्यः प्रभाकरः चतुर्वर्षदेशीयो भूत्वा १९०९ ख्रिस्ताब्दस्य प्रारम्भकाले दिवं गतः। यथा सावरकरैः तदुपरि विरचितायां कवितायां स्वयमेव उक्तमस्ति, प्रभाकरः 'अमूर्तः कल्पनामात्रो मधुरो हृदयंगमः' अतिष्ठत्। तस्य स्मृतये ग्रन्थोऽयम् अर्पणीयः इति तैः अभिलषितम् आसीत्। दैवदुर्विलासात्तु यथा तेषां 'प्रभ्या', तथैव अयं ग्रन्थोऽपि अत्यन्तनष्टतया 'अमूर्तः कल्पनामात्र'तां गतः !

उपमासद्वयं सावरकराः पॅरिस-नगर्याम् अवसन्। तदुत्तरं तु तादृशाः समाचाराः तेषां कर्णपथम् आगताः, येन ते तत्र अधिकं वासम् नारोचयन्। एकतः नासिक्यग्रामे शासनेन क्रियमाणस्य कठोरस्य स्वजन-पीडनस्य वार्ताः तान् प्रापुः। अन्यतश्च तैः श्रुतं यत् लण्डने तेषाम् अनुपस्थितिकारणात् अभिनवभारतीयेषु कार्यकर्तृषु शैथिल्यनैराश्ययोः प्रवेश इव संजातोऽस्ति, न च ते अतः परम् आङ्ग्लभूमौ वस्तुम् अतीव उत्सुकाः सन्तीति। सावरकराणां चित्तं चिन्ताव्याकुलं बभूव। किं करोमि ? अपि भारतं गच्छामि, यत्र मदर्थे त्यक्तजीविता मित्रबान्धवा क्रूरं दण्डं सहन्ते ? उत आङ्ग्लभूमिं निवर्ते यत्र भयाशङ्किनो मे सहकारिणः अत्र सुस्थितस्य मम उपदेशं कदाचित् सुकरपाण्डित्यं मन्ये-रन् ? बहुविचारोत्तरं तैः भारतं गन्तुं निर्णीतम्। पं. श्यामजी-प्रभृतिभिः सुहृद्भिस्तु 'न भवता भारतं प्रति गन्तव्यम्। ननु भवन्निग्रहोत्सुकमेव भारतशासनम्। अतः अत्रैव वस्तव्यम्। यदि तु अत्र वासः भवते नैव रोचते, न्यूनतोन्यूनम् आङ्ग्लभूमिं गन्तव्यम्, न भारतम्' इति साग्रहं प्रार्थिताः सावरकराः आङ्ग्लभूमिं प्रातिष्ठन्त (१३-३-१९१०)।

लब्ध-भारतशासन-संदेशम् आङ्ग्लशासनं तु तेषां प्रतीक्षापरमेव आसीत्। आङ्ग्लभूम्यां न्यस्तपदा एव सावरकरा निगृहीताः।

१३-३-१९१० दिने सावरकरा निगृहीताः, 'बो-स्ट्रीट'-आरक्षकशालां च नीताः। दिनद्वयोत्तरं अय्यर महाभागाः तान् द्रष्टुं प्राभवन्। सावरकराः आरक्षकशालायामपि तथैव प्रसन्नमुखवर्णाः अय्यर-महाभागैर् विलोकिताः। कथा-प्रसङ्गेन 'अहं यदि अण्डमानं निर्वासितः भवेयम्, ज्येष्ठभ्रातुर् दर्शनस्य भाग्यभाग् भवेयम्' इति सावरकराः पर्यहसन्। परिहासस् त्वयम् अय्यर-मनसि कामपि व्यथाम् अजनयत्।

शीघ्रमेव एका 'सावरकर-विमोचन-समितिः' निर्मिता अभूत्। सावरकराणाम् अभियोगः यथा आङ्ग्लभूमावेव प्रचलेत्, यथा च ते भारतं न नीयेरन् तथा प्रयतितव्यम् इति निरणीयत। सावरकराणां मोचनस्य वैधावैधाः सर्वे उपाया आस्थातव्या इत्यपि निर्णीतम्। तेषां प्रातिभाव्येन मोचनं प्रार्थितम्। न्यायालयेन तु इयं प्रार्थना प्रत्याख्याता (२०-४-१९१०)।

नाङ्गीकृतं व्रतमिदं सहसाऽन्धभक्त्या –

सावरकरानुयायिनाम् एतेषु उद्यमेषु प्रचलत्सु स्वयं सावरकराः अन्यस्मिन्नेव कर्मणि व्याप्रियन्त। तेषां स्वीयो बन्दिग्रहणवृत्तान्तः भारतस्थिताय गृहजनाय तथा निवेदनीय आसीत्, यथा स्वार्थत्यागस्य अस्य क्रमप्राप्ततताप्रतीतिः मनोव्यथां शिथिलीकुर्यात्, कर्तव्यपूर्तेश्च समाधानरूपा सान्त्वना लभ्येत। तदर्थं 'माझें मृत्युपत्र' (मदीयं निर्याणपत्रम्) इत्याख्यं एकं श्लोकबद्धं पत्रं तैः मातृनिर्विशेषायै ज्येष्ठायै भ्रातृजायायै प्रेषितम् (अर्थात् चोरितकेन!)। मराठीसाहित्यस्य ललामभूता इयं कविता अस्माभिः किञ्चिदिव विस्तरशः अत्र अनूद्यते–

पुरा यौवनवसन्ते संपन्नाः ते ते स्निग्ध-जन-समागमाः, तत्र च संवृत्ताः स्वातन्त्र्यमन्त्रणाः, कृताश्च प्रतिज्ञा इत्येतदादिकं सावरकराः एवं तत्र स्मारयन्ति (अग्निजा पृ. २९-३३) –

कालो मधुः स, मधुरः प्रियसंगमोऽसौ
सा चन्द्रिका, नवकथासुभगा निशा सा।
ध्येयं च दिव्यमथ मातृविमोक्षरूपं
निर्धार उग्र, उपदेशकृतिश्च तथ्या॥

कच्चित् कृताः स्मरसि ता 'वहिनी' प्रतिज्ञाः
तत्राभवन् प्रियजनैः सह यास्तदानीम् ?
'वाजिप्रभुं ह्यनुसरेम वयं' युवानो
'वीराश्चितोऽयुवतीश्च वयं' युवत्यः ॥

एवं पूर्वप्रतिज्ञाः स्मारयित्वा मातृमोक्षरूपं यद् दिव्यदाहकं सतीव्रतम् अङ्गीकृतम् आसीत् तत् न अन्धभक्तिप्रेरितम् अपि तु कठोरविमर्श-पूर्वकम्, इति स्पष्टीकर्तुं सावरकरैः लिखितोऽस्ति स प्रथितः श्लोकः —

नाङ्गीकृतं व्रतमिदं सहसाऽन्धभक्त्या
स्पष्टं हि दृष्टमितिहास-निसर्ग-तर्कैः ।
दिव्यस्वरूपमत एव च दाहकं यद्
बुद्ध्यैव विद्ध्यनुसृतं तदिदं सतीत्वम् ॥

प्रतिज्ञोत्तरं सप्ताष्टैरेव वर्षैः देशे यत् प्रचण्डं प्रबोधनं संपन्नम्, कृपणताम् उत्सृज्य आसेतुहिमाचलेन देशेन यो वीरभावः धृतः, तत्सर्वम् उल्लिख्य स्वार्थस्य अत्यन्तत्यागद्वारा निजं प्रतिज्ञापूर्तिजं समाधानम् एवं प्रकटयन्ति सावरकराः —

वृत्तास् तदा प्रियजनैः सह याः प्रतिज्ञा
आपादिता करणतश् चरितार्थतां ताः ।
दीप्तानले च निजमातृविमोचनार्थं
दग्ध्वा निजार्थमभवाम वयं कृतार्थाः ॥

कः कः स्वार्थोऽग्निसात् कृत इति चेत्—

तुभ्यं मनोऽर्पितमिदं मम मातृभूमे
तुभ्यं च वैभवगुरुः पटुवाग्विलासः ।
काव्यं नवं रसघनं च तथैव तुभ्यम्
एका त्वमेव विषयो मम लेखनेऽभूः ॥

त्वत्स्थण्डिलाहुतिकृतः प्रियमित्रसंघो
भोगक्षमं नववयो, वपुरुत्तमं च ।
कार्यं च यत् सुरमतं तव मोक्षरूपं
पुण्यं, तदेव रघुपूजनतां ममागात् ।।

त्वत्स्थण्डिलाहुतिकृतं गृहमस्मदीयं
कान्ता च नूतनसुता, सकलं च वित्तम् ।
भ्राता तथा सकलधैर्यवतां वरिष्ठो
ज्येष्ठो ह्यसौ परमकारुण-पुण्यसिन्धुः ।।

त्वत्स्थण्डिलाहुतिरभूत् स च 'बाल' बन्धुस्
त्वत्स्थण्डिले च मम संप्रति देहपातः ।
एतद्धि किम् ? यदपि सप्त वयं भवेम
सप्तापि तांस् तव कृते ह्यहमुत्सृजेयम् ।

पिबतु वाचकः यथाशक्ति इमम् अग्निरसम् ! वयं तु तस्य उपन्यासमात्रे प्रभवः ।

अस्मिन्नेव कारावासे 'मूर्ति दुजी ती' (द्वितीया मूर्तिः) इत्याख्या द्वितीया प्रदीर्घा कविता बीजरूपेण तेषां मनसि स्फुरिता। तीव्रशैत्यवशात् जलाशयस्थेन जलेन सह शरीरस्थे रुधिरेऽपि स्त्यानीबुभूषति निजं मनः वज्रसारीकर्तुं सावरकरैः यो विचारवह्निर् हृदये प्रदीपितः, स एव कालान्तरेण अण्डमाने एतत्पद्यरूपेण साकारोऽभवत् । कवितायाम् अस्यां कविः भगवतीं शारदां तस्याः अपरिचितां, परुषभीषणां, सर्पायमाणकेशां, रुण्डधरां, छिन्नमुण्डां, निजरुधिरौघबहल-धारां स्वयमेव पिबन्तीं 'द्वितीयाम्' मूर्ति प्रदर्शयितुं प्रार्थयते, या हि कवये उग्रमनोबलदायिनं वरं वितरेत् (दृश्यताम् अग्निजा पृ. ४२-५७) !

सावरकराणाम् अभियोगः मासत्रयप्रायं कालं प्रावर्तत । अन्ते १२-५-१० दिने न्यायालयेन निर्णयः कृतः यत् भारतशासनमेव सावरकरान् अभियोक्तुम् अधिकारवत्, अतः ते भारताय प्रेषणीया इति । एतन्निर्णयोपरि कृता पुनर्विचारप्रार्थना २१-६-१० दिने प्रत्याख्याता । अत्रान्तरे

आयरिशानां क्रान्तिकारकाणां साहाय्यबलेन कृताः केचन सावरकराणाम् अपवाहनप्रयत्नाः न किमपि फलं बिभरांचक्रुः । सावरकराणां भारतप्रेषणं निश्चितम् अभूत् । अस्याम् अवस्थायामपि 'ऋषि' इत्यपरसंज्ञकेभ्यः अय्यरमहोदयेभ्यः लिखिते पत्रे "सुस्वस्थप्रकृतिस्थोऽस्मि । यत्सत्यं 'पौण्ड' द्वयेन मम देहभारः प्रवृद्धोऽस्ति—न तु चतुष्पौण्डात्मकस्य लम्ब-कूर्चस्य वृद्धिकारणात्' इति सावरकरैः परिहासः कृतोऽस्ति!

१–७–१०दिने ते भारतानयनार्थं 'मोरिया-' नाम्नीं बाष्पनौकाम् आरोपिताः !

तावत्कालपर्यन्तं प्रियवयस्याः ! नमस्ते ! नमस्ते !

अग्रिमवृत्तान्तकथनात् पूर्वं सावरकरैः स्वसहकारिभ्यः प्रेषितम् आङ्ग्लभाषामयम् मुक्तच्छन्दम् आमन्त्रणपत्रम् अत्र निर्देशम् अर्हति । अल्पाकारस्य सतोऽपि गभीराशयकारणात् महाकाव्यायमानस्य चतुष्ख-ण्डस्य अस्य पत्रकाव्यस्य एकमेव खण्डम् अत्र अनूद्यते । तावन्मात्रमपि सावरकराणां हृदयबद्धस्य गीतोक्त-निष्कामकर्मयोगस्य पर्याप्तं सूचनं करोति ।

वयम् अन्योन्यम् आपृच्छामहे ।
विधातृविहितां स्वां स्वां भूमिकां नाटयितुम् ।
कदाचिद् वयं तप्तशिलासु दृढं निगडिताः स्याम ।
यशःसिन्धौ कदाचित् तरङ्गात् तरङ्गान्तरम् आरुहेम ।
क्वचिद् दृष्टाः , क्वचिन् नष्टाः ।
कदाचिद् उच्चैः , कदाचिन् नीचैः ।
अनन्तकोटिब्रह्माण्डनायकेन परमसेनानायकेन
यत्र कुत्रापि निवेशिताः स्याम ।
तदेव स्थानं परमं मन्यमानाः ।
तेनैव कर्मणा आत्मानं धन्यं मन्यमानाः ।
वयम् अन्योन्यम् आपृच्छामहे ।
विधातृविहितां स्वां स्वां भूमिकां नाटयितुम् ।

यथा कस्मिंश्चिन्नाटके भारतीये
सर्वे नटा अन्तिमेऽङ्के समेयुः ।
एवं वयम् - ये नटा एव सर्वे –
समेताः स्यामेतिहासस्य मञ्चे ।।
सामाजिकीभूय मनुष्यजातिः ।
सर्वान् अस्मान् अभिनन्देत् कृतज्ञा ।
आनन्दोत्थस्तालशब्दश्च यस्या
दिशः सर्वाः पूरयेच् चान्तरिक्षम् ।।

तावत्कालपर्यन्तम्, प्रियवयस्याः, ' नमस्ते ', ' नमस्ते ' ।

* * *

६. हनूमत्-प्लुतिः, जीवितद्वयावधि निर्वासनं च ।

सावरकरान् आदाय ' मोरिया ' नौका १-७-१० दिने प्रस्थिता । सावरकरैः सह कृतमन्त्रैः अय्यर-महोदयैः द्वित्रदिनपूर्वमेव प्रस्थितम् आसीत् । नौका शनैः शनैः मार्गम् आक्रमितुं प्रारभत । तस्याः वेगेन सह प्रवृद्धः सावरकराणामपि विचारचक्राणां वेगः । सावरकराः साहसिक-प्रकृतिकाः । कथमिव कारागृहे द्वीपान्तरे वा ते क्षीयेरन् ! तादृशं विचारमपि ते कथमिव सहेरन् ? तेषां दैवतभूतेन छत्रपति-शिवाजिना बुद्धिबलमाश्रित्य कारागारात् पलायने साफल्यं संपादितम् आसीत् । सावरकरैः मनसि निर्णीतम् - प्रथममेव अवसरम् आसाद्य अहं पलायिष्ये ।

७–७–१० दिने सायं नौका मार्सेलिस-नौकाशयं प्रापत् । तत्र च सा यथापूर्वनिर्णीतम् अतिष्ठत् । कस्यचिद् यान्त्रिकवैक्लव्यस्य दूरी-कर्तव्यतया नौका यावच्छक्यं तटसमीपम् आनीता । सावरकरैः चिन्तितम्– एषोऽवसरः । साहसिकाः सन्तोऽपि न ते अविमृश्यकारिणः आसन् । उभयतो विचारपराणां तेषां रात्रिः प्रभातकल्पा ।

प्रभातमात्रायां रजन्यां सावरकरा उदतिष्ठन् । शौचाय गमनेच्छां प्रकटीकृत्य आरक्षकाभ्याम् अनुगम्यमानाः ते शौचालयं प्राविशन् । तयोरेक

तावत् ते उपनेत्रानयनव्याजेन व्यसर्जयन् । अन्तः प्रविश्य झटिति तैः द्वारं पिनद्धम् । बहिःस्थितानाम् अन्तर्गृहव्यापार-पिशुनः आदर्शः तदुपरि स्वीयं रात्रिवस्त्रं प्रक्षिप्य प्रावृतः । पलायनयोजना प्रागेव मनसि निश्चिता आसीत् । 'पोर्टहोल'संज्ञकस्य वातायनस्य परिमाणमापनं तैः प्रागेव कृतम् आसीत् । क्षणार्धेन तद् वातायनम् आसाद्य तैः तद् उद्घाटितम्, यावच्छक्यं शरीरं संकोचितम्, महता यत्नेन च तेन विवरेण निःसृत्य, आत्मानं च जले प्रक्षिप्य, नगराभिमुखीभूय प्रारब्धं तैः वेगेन जलशृङ्खलानां कर्तनम् ।

अत्रान्तरे आदर्शपिधानेन जातसंशयः आरक्षकः द्वारोद्घाटनं प्रारभत । अन्ते यत्नेन द्वारं भङ्क्त्वा यावत् प्रविशति, तावत् वातायनेन निःसरन्तः सावरकराः तेन दृष्टाः । तथा कर्मणि अशक्तेन तेन उपरितनीं भूमिकां गत्वा आक्रोशः प्रारब्धः । तत्पूर्वमेव तत्र स्थितेन केनापि अधिकारिणा पलायमानान् सावरकरान् दृष्ट्वा तान् निग्रहीतुं स्वयमपि सागरे अवप्लुतम् आसीत् । अधुना अनेनापि आरक्षकेण तदेव कृतम् । उभाभ्याम् अनुसारः प्रारब्धः ।

सावरकरा अग्रतःसरा आसन् । वातायनात् निःसरणवेलायां संकुचितेऽपि शरीरे यानि घर्षणजन्यानि क्षतानि उत्पन्नान्यासन्, तत्र अधुना सागरः क्षारं क्षेप्तुं प्रारब्धवान् । तद् अविगणय्य, संभाव्यं गोलिकावर्षं वञ्चयितुकामास् ते क्वचित् जलान्तः क्वचिच्च जलोपरि इति पर्यायेण तरन्तः अन्ते तटम् आसादयन् । एष तटः स्पृष्टः । जितम् ! सकृत् हस्तस्खलनेन अधः पतितास्ते तद् अनिमित्तम् अवधूय पुनः प्रयत्नेन तटम् आरोहन् । झटिति सर्वतोदिशं तैः दृष्टिः प्रक्षिप्ता । न कोऽपि सहकारी तेषां दृष्टिगोचरोऽभवत् । क्षणमात्रानुभूता निराशा तैः निगलिता । एकैकः क्षणो महार्घ आसीत् । न तेषाम् अनुसारिणौ अलक्षितौ आस्ताम् । समीपे वाहनार्थं कपर्दिकापि नासीत् । गत्यन्तरम् अपश्यद्भिस् तैः धावितुं प्रारब्धम् । ५०० मीटर-प्रायम् अन्तरं धावित्वा तैः कश्चिद् आरक्षकः दृष्टः। तम् उपगम्य 'आश्रयार्थी अहम् । तव वरिष्ठाधिकारिण प्रति मां नय' इति ते प्रार्थयितुं प्रवृत्ताः । आङ्ग्लभाषानभिज्ञः आरक्षक यावत् संभ्रान्तस् तथैव तिष्ठति, तावत् चोरंकारम् आक्रोशन्तौ अनु

सारिणौ प्राप्तौ। एकेन सावरकराः गले विधृताः, अपरेण च हस्ते। अन्ताराष्ट्रियविधेर् अज्ञानाद्वा, दानप्रयोगवशीभूतत्वाद्वा तेन आरक्षकेण सावरकराः अनुसारिभ्यां समर्पिताः। स्वीयं बन्दिनं हस्तसात्-कृत्य तौ नौकां प्रतिन्यवर्तेताम्।

ते च त्रयो नौकां प्रापुः, अय्यर-कामा-प्रभृतयश्च सावरकराणां सहकारिणः सज्जीकृतवाहनाः पॅरिसतः मार्सेलिस प्राप्ताः ! गतशोचनमेव तु अधुना अवशिष्टमासीत्। बुद्ध्या चिन्तितः, साहसेन च अनुष्ठितः कश्चित् महान् उद्यमो विफलोऽभवत्। भारतीयस्वातन्त्र्यवादः जगति महतीं ख्यातिं लेभे इति तु लाभपक्षे गणनीयम्। तस्य फरेञ्च-आरक्षकस्यापि कर्तव्यच्युतिकारणात् पश्चात् वृत्तिच्छेदोऽभवत्।

'अनादि मी, अनंत मी'

इतः पूर्वं बन्दिनां सतामपि सावरकराणां किंचित् स्वातन्त्र्यमिव आसीत्। अधुना तु तत् सर्वं नष्टम्। अधुना हस्तपादौ निगडबद्धौ। आरक्षणं कठोरम् अभवत्। केचिद् आरक्षकाः सगालिशब्दं ताडनायापि प्रवृत्ताः। सावरकराणां सात्त्विक-कोपोद्रेकेण हतबलास्तु ते न तथा कर्तुं प्राभवन्। तदानीम् दारुणयातनाम् आशङ्कमानैः सावरकरैः तादृशयातना-सहन-पर्याप्तस्य धैर्यस्य संग्रहार्थं यः कवचमन्त्रो जप्तः तस्य अंशः अत्र अनूद्यते–

अनादिमान् अनन्तवांस् तथाऽस्म्यवध्य एव च।
क्व जात एव शत्रुरस्ति यो हि मां रणे वधेत्।
अहं हि धर्मधारणे रणे विशामि वेगतः।
यदाऽन्तकस्य संमुखं समागमेच्छया स्वयम्।
तदाऽनलो न मां दहत्यसिर्न वा छिनत्ति माम्।
भिया मदेव कातरः पलायतेऽन्तकः स्वयम्।
मुग्धता रिपोरहो !
मृत्युमेव मे बिभीषिकां चिकीर्षति ॥

गीतोक्तानां 'नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः' इत्यादीनां पङ्क्तीनां न केवलं प्रतिध्वनिरेव अत्रास्ति; तस्य तत्त्वज्ञानस्य व्यवहारे आत्मसात्कृतिप्रयत्नोऽपि।

तत उत्तरं कामपि विशेषां घटनां विना शेषः प्रवासः समपद्यत। एडन-नौकाशये नौकान्तरं संजातम्। एस्. एस्. साष्टी-नौकया अग्रिमः प्रवासः प्रारब्धः। २२-७-१० दिने मुम्बापुरी प्राप्ता। मुम्बापुरीतः सावरकराः साधु नासिक्यं नीताः।

अभियोगः

५-९-१० दिने मुम्बापुर्यां विशेष-न्यायाधीशमण्डलस्य पुरतः अभियोगः प्रारब्धः। वस्तुतः फरान्स-भूमि-स्पर्शनोत्तरं सावरकरोपरि कस्य अधिकारः इति फरान्स-आङ्ग्लदेशयोर् विवादः उत्थित आसीत्, स च हेग-स्थिते अन्ताराष्ट्रिय-न्यायालये निर्णयार्थं समर्पित आसीत्। भारत-शासनेन तु बुद्ध्यैव तन्निर्णयम् अप्रतिपाल्य अभियोगः प्रारब्धः, हठात् पुरःसारितश्च। सावरकरोपरि द्वौ आरोपौ कृतौ, शस्त्रसंग्रह-उपजापादि-द्वारा राजद्रोहरूपः एकः, जॅक्सनवधस्य प्रचोदनारूपः अन्यः। प्रथमाभि-योगे सावरकरैः सह अन्ये बहवः सहाभियुक्ता आसन्। द्वितीये केवलं सावरकराः। 'नायं न्यायालयो मम प्रभवति। फरान्सदेशस्यैव मदुपरि अधिकारो वर्तते। तत्रैवाहं प्रेषणीयः' इत्युक्त्वा सावरकराः तटस्था अभवन्। प्रथमस्य अभियोगस्य निर्णयः २४-१२-१० दिने उद्घोषितः। सावरकरा आजीवितं निर्वासिताः, तेषां च सर्वस्वं राजसात् अभूत्। अन्येऽपि सहाभियुक्ताः यथायथं न्यूनाधिकं दण्डम् अवाप्नुवन्।

सर्वेषां दण्डघोषणोत्तरं यावत् न्यायाधीशः स्वस्थानात् उत्तिष्ठति, तावत् सर्वेषाम् अभियुक्तानां मुखात् एकरवेण युगपत् घोषणा उदचरत्-'विजयतां स्वातन्त्र्यलक्ष्मीः'!

प्रथमो देयांशः

पूर्वस्यां रात्रौ (२३-१२-१०) निजदण्डम् उत्प्रेक्षमाणैः सावरकरैः तद्गतां निजभावनां प्रकटीकर्तुं 'पहिला हप्ता' (प्रथमो देयांशः) इत्याख्या कविता प्रणीता। तस्यां च 'मातृभूमेर् उपकाराणां निष्क्रयस्य प्रथमोंऽशः एतद्दण्डरूपेण मया दीयते। जन्मनि जन्मनि मम कायः मातृभूमि-मोचनकार्ये पततु' इत्युक्त्वा 'रामसेनानिका कृष्णसारथिश्च कोटिकोटि-स्वातन्त्र्यसेना असत्यपि मयि अग्रतःसरी भूत्वा हिमालयोपरि

स्वातन्त्र्यस्य उज्ज्वलं ध्वजम् आरोपयिष्यति ' इति विश्वासः तैः प्रकटीकृतः !

द्वितीयोऽभियोगः २३–१–११ दिने प्रारब्धः, ३०–१–११ दिने च तन्निर्णयः प्रकाशतां गतः । अन्यदेकं जीवितावधि निर्वासनं ते दण्डिताः । उभयं च निर्वासनं न एककालिकम्, किं तु आनुक्रमिकम् इति पश्चात् स्पष्टीभूतम् । ५० वर्षात्मकं निर्वासनं सावरकराणां भोक्तव्यतया आपतत् इति यावत् ।

दण्डश्रवणोत्तरं सावरकरैर् धीरगम्भीरेण स्वरेण उक्तम् – 'एष सिद्धोऽस्मि युष्माभिः स्वविध्यनुसारं प्रदत्तं कठोरतमं दण्डम् सोढुम् । यतो ममायं विश्वासः, यत् त्यागक्लेशयोः पथैव अग्रतः सरन्ती अस्माकं मातृभूमिः अन्तिमं विजयम् आसादयेत् ' ।

सर्वं तन्तुकुट्टनम् ! सर्वं पिष्टपेषणम् !

एतदुत्तरं मासेन हेग-न्यायमण्डलेन निर्णयः प्रदत्तः यद् अनावश्यकं सावरकराणां फ्रान्स-राष्ट्राय समर्पणम्; प्रभवति भारतशासनं तेषाम् । एतस्मिन् निर्णये विदिते सावरकराः नागरिकवेषापनयनपूर्वकं बन्दि-सामान्यवेषं परिधापिताः । कारावासस्य च सश्रमतया रज्ज्वाः तन्तुकुट्टनं कारागारीयकार्यत्वेन आपतत् । सावरकराणां चित्तं क्षणमात्रम् अव्यथत । मयापि नाम इदं कर्तव्यम् ? समुद्रमन्थनार्थं निर्मितः मन्दर-पर्वतः क्षुद्र-घटीये दधिमन्थने उपयोक्तव्यः ? अन्यस्मिन्नेव तु क्षणे तैः एवम् आत्मा समाहित :–

ननु प्रारभस्व ! तन्तुकुट्टनमेव नु ? अयि मुग्धमानस ! किमत्र लाघवम् ? पिष्टपेषणतया आयुर् वृथा क्षीयते ? ननु इदं जीवितमेव तावत् किंचित् तन्तुकुट्टनम् । किंचित् पिष्टपेषणम् । तन्तुभूतानि पञ्चमहाभूतानि संग्रथ्य संग्रथ्य, तान् दीर्घान् कारं-कारम् इयं जीवितरज्जुः आवेष्टयते । विशरणोन्मुखी च सा मृत्युमुद्गरेण कुट्टयित्वा, तन्तुभावेन च परिणमय्य पञ्चमहाभूतानां राशौ प्रक्षिप्यते ।

प्रभातमनु सायम्, सायमनु प्रभातम् । सर्वं तन्तुकुट्टनम् ;

वयम् ओषधीः उपजीवामः, एवं जीवन्तः कदाचित् म्रियामहे, मृतांश् चास्मान् ओषधयः उपजीवन्ति । सर्वं तन्तुकुट्टनम् ! तेजोमेघात् सूर्यमाला उत्पद्यते, सूर्यमालातः पृथिवी, केनचित् धूमकेतुना समाहृतायाश्च तस्याः पुनस् तेजोमेघभावः ! सर्वं तन्तुकुट्टनम् ! तस्यैव महातन्तुकुट्टनस्य अवश्यः अपरिहार्यश्च अंशो नाम इदं रज्ज्वाः उद्वेष्टनपूर्वकं तन्तुकुट्टनम् ! यदि तद् महातन्तुकुट्टनं महत्त्वान्वितम्, यदि न स आयुषः वृथा क्षयः, तर्हि इदम् अल्पकं तन्तुकुट्टनमपि किंचित् कर्तव्यं कर्म । तस्यैव अविभाज्यांशत्वात् ।

एतस्मिन् काले सावरकराः मुम्बापुर्यां 'डोङ्गरी' इत्यत्र काराबद्धा आसन् । महाकाव्यमेकं रचनीयम् इति तेषां बाल्याद् आरभ्य हृदयसंचितः अभिलाषः आसीत् । राजकीय-कार्यान्तरशत-व्यापृततया अलब्धावकाशं तमभिलाषम् अधुना पूरयितुं तैः चिन्तितम् । काव्यनायकतया च तैर् उपात्तः स्वसमावस्थः पराभवाहतः बन्धुपरित्यक्तश्च सन्नपि परिपीत-पराभव-हलाहलः सिंहायमानः श्रींगुरुगोविन्दः ! एषु दिनेषु ते प्रत्यहं प्रातरुत्थाय व्यायामार्थं पादविहरणावसरे योगसूत्राणि पठन्ति स्म, एकैकसूत्रोपरि च मननं विदधति स्म । तत उत्तरं कायेन तन्तुकुट्टनादि सश्रमं कार्यम्, तेन सहैव च मनसा काव्यरचनम् । सायं ध्यानधारणादिकम् ।

वीरपत्नी–संदेशः

एवं कतिपयेषु दिनेषु गतेषु सावरकराणां पत्नी तान् द्रष्टुम् आगता । चतुर्वर्षोत्तरं संपद्यमानम् इदं दर्शनम्, तथैव च अन्तिमप्रायम् । तदानीं प्रस्थापन-मङ्गलावसरे 'माई'भिः किम् आशंसितम् आसीत्, किं च एतत् संवृत्तम् ! बॅरिस्टरवस्त्रैः सुशोभितकायस्य, लब्ध-पदवीकस्य, प्राप्तजनसंमानस्य स्थाने कारागारीय-स्थूलवासाः, प्ररूढश्मश्रुः, निगडबद्धहस्तपादश्च पतिः द्रष्टव्योऽभूत् । हा धिक् । अनतिक्रान्त-विंशतिवर्षा इयं बाला कथमिव यापयतु निजं समग्रम् आयु.? सावरकरैः कथाप्रसङ्गेन एवं समाश्वासिता आत्मनः सहधर्मचारिणी ।

यदि भगवान् सानुक्रोशः स्यात्, आवयोः पुनर्दर्शनं भविष्यत्येव । यदि कदाचित्तु बलवान् क्षुद्रसंसारमोहः अभिभवितुं प्रवर्तेत,

तर्हि एवं चिन्तयतु आर्या—यदिदं सुतानु-सुतानाम् उत्पादनम्, यच्च त्रिचतुरैः काष्ठकैः गृहनीडानां विरचनम् किम् अयमेव संसारः? अयं तावत् काकचटकीयः संसारः। यदि तु संसाराख्यं वस्तु इतोऽपि उन्नततरं स्यात्, तर्हि तादृशस्य मानवोचितसंसारस्य निर्वहणेन आवामपि कृतार्थौ स्वः। कामम् आवयोः त्रिचतुराः क्षुद्रमृद्घटाः आवाभ्यां भग्नतां नीताः। तथापि को नु वेद? कदाचित् तेनैव हेतुना सहस्रशः अन्येषां सुवर्णभाण्डानि गृहाणि समुत्थास्यन्ति।

एतावान् वीरपत्नीसंदेशः, इत्येव कालिदासो ब्रूयात्।

कैश्चित् दिनैः सावरकराः डोङ्गरीतः, भायखलास्थं कारागारं, ततश्च 'ठाणा' कारागारं नीताः, ततश्च लोहशकटम् आरोपिताः। कांचिद् उन्मत्तां व्याघ्रीमिव ग्राममनु ग्रामम्, नदीमनु नदीं, पर्वतमनु पर्वतं च पृष्ठतः कृत्वा मद्रास-नगरम् उद्दिश्य महता वेगेन धावन्तीं लोहशकटीं दृष्ट्वा सावरकराणां मनसि विचारः आयातः—

यावता महता वेगेन इयं मां मातृभूमितः विकृष्य द्वीपान्तरं नयति, तावतैव वेगेन इयं मां कदा पुनरत्र आनेष्यति? आनेष्यत्यपि वा! अथ वा कुतः आनेष्यति?... किं न सैबेरियायां 'हा रूस!' इत्याक्रोशन्तः शतशो जनाः अम्रियन्त? मयापि अण्डमाने तथैव 'हा भारत!' 'हा हिन्दुस्थान!' इत्याक्रोशता मर्तव्यम्!

जुलै-मासस्य प्रायः प्रथमदिवसे 'महाराजा' नावम् आरोप्य सावरकराः अण्डमानाय निर्वासिताः। पञ्चाशद्वर्षाणि निर्वासनाय! तदानीं ते केवलम् अष्टविंशतिवर्षा आसन्!

* * *

७. अण्डमान - वनवासः

४-७-११ दिने 'महाराजा' अण्डमानं प्राप। तत्र च सिल्व्हर-जेल (सेल्यूलर जेल इत्यस्य बन्दिजनभाषीयः अपभ्रंशः) इत्याख्यस्य कारागृहस्य सप्तक्रमाङ्कं भवनं सावरकराणां कृते रिक्तीकृतम् आसीत्। तस्य तृतीयायां भूमिकायां एकाकिनः सावरकराः नियन्त्रिताः।

तदानींपर्यन्तं सावरकराणाम् आङ्ग्लशासकैः सहैव योद्धव्यम् आसीत्। अधुना अण्डमाने बन्दिपालः बॅरी, तस्य च क्रूरमनस्काः पठाण-बहुला हस्तका इत्यादयः शासनप्रतिनिधयः आसन्नेव। तैः सहैव अधुना सावरकराणां योद्धव्यम् आसीत् रोगानुकूलेन वायुमण्डलेन सह। भोक्तव्येन कदन्नेन सह। आक्रामद्भिः रोगैः सह। अन्तरान्तरा च आपतद्भिः नैराश्याघातैः सह। अण्डमानरूपे जीवन्नरके तस्यां तस्यां परिस्थितौ, तेन तेन यथालब्धेन साधनेन यत्ते तां तां यथाशक्यां देशसेवाम् आचरन्तस् तस्थुः, सा खलु परा काष्ठा कर्मयोगस्य।

यथा हत्यादि-क्रूरकर्मिणां सामान्यबन्दिनाम्, तथैव राजबन्दि-नामपि निर्वासनार्थम् अण्डमानाय प्रेषणं पूर्वमेव रूढम् आसीत्। सावर-कराणां ज्येष्ठो भ्राता प्रागेव तत्र प्रेषित आसीत्। अनेके वङ्गीयाः युक्तप्रान्तीयाश्च क्रान्तिकारकाः सावरकराणां गमनकाले तत्रैव आसन्। तन्मध्ये हेमचन्द्र-दास इत्यादयः सावरकराणां केचन पूर्वपरिचिता अपि आसन्। बाह्यजगतो वार्ता मनागपि राजबन्दिनः प्रति यथा न प्राप्नुयात्, तथा कारागृहाधिकारिणो दक्षा आसन्। अतः कदाचित् सहसैव सावर-करान् तत्र दृष्ट्वा गणेशपन्तानां दुःखविस्मययोर् अभिव्यक्तिः 'तात्या! कथं त्वमपि नाम अत्रैव!' इत्येकेनैव वाक्येन यथाकथंचिद् अभवत्।

अण्डमान-गमनोत्तरं कैश्चिदेव दिनैः सावरकरैः मुम्बई-विश्व-विद्यालयात् पत्रं लब्धम्, यत्र तेषां बी. ए. उपाधेः प्रतिसंहृतिः निवेदिता आसीत्। अयमपि विनोदः।

आदौ तावत् तन्तुच्छेदनं तथा च रज्जुवेष्टनम् इति द्वितयं कर्म सावरकराणां कर्तव्यम् आसीत्। काव्यरचनमपि तैर् आरब्धम्। गुरु-गोविन्दसिंह-विषयकं काव्यं समाप्तम् आसीत्। अधुना अत्र विजने

'कमला' विकसितुं प्रारब्धा। लेखनसाधनाभावात् सुधालिप्तायां भित्तौ कण्टकेन लिखितां तां भारतप्रस्थितं कंचित् मुक्तबन्दिनम् अध्याप्य, तद्धस्तेन– नहि नहि तन्मुखेन– तैः 'कमला' भारताय प्रेषिता।

तैलयन्त्रभ्रामणम्

अण्डमानीयेषु कारागारकार्येषु तैलयन्त्रस्य (भाषायां 'कोलू' 'घाणा' वा इत्याख्यस्य) भ्रामणं नाम एकं भयानकं कार्यम्। वरान् वरानपि तत् निःसत्त्वतां नयति स्म। ऑगस्ट १६ तः सावरकरा अपि इदं तैलयन्त्रभ्रामणं कारिताः। अथैकदा श्रमातिरेकेण अभिभूतधैर्यान् तान् आत्मघातोऽपि मोहयितुं प्रवृत्तः। दिष्टया तु तैः विवेकेन आत्मा स्थिरीकृतः। तैलयन्त्रसदृशीनां कठोरयातनानां बलीभूतैः इन्दुभूषणसदृशैः अनेकैः आत्महत्या कृता, अनेके च उल्हासकर दत्तसदृशाः उन्मत्ताः संजाताः। तदानीं 'भवान् कदा उन्मत्तो भविता' इति पृष्टाः सावरकराः 'भवान् पूर्वम्। ततः पश्चात् कदाचिद् अहम्' इत्यात्मविश्वासपूर्णैः शब्दैः बारी-मुखं पिहितवन्तः। राजबन्दिनां यातनाः, तेषां च प्रतिक्रियारूपाणि कार्यस्थगनानि इत्याघातप्रत्याघाताः दीर्घकालं प्राचलन्।

डिसेम्बर मासे पञ्चम-जॉर्जः सिंहासनम् आरोहत्। तस्मिन् प्रसङ्गे कैश्चिद् बन्दिभिः कारामुक्तिः अवाप्ता, कैश्चिच्च दण्डलाघवम्। एतद्वञ्चितैः सावरकरैस्तु तदानीम् उद्घोषिता वङ्गभगस्य प्रतिसंहृतिरेव निजपारितोषिकीकृता।

क्रमेण १९१२ ख्रिस्ताब्दः समाप्तप्रायः। ततश्च अण्डमानीयनियमानुसारं गृहजनं प्रति वार्षिकपत्रस्य प्रेषणानुमतिः सावरकरैः लब्धा। १५–१२–१२ दिने लिखितम् इदं पत्रं नाम बन्दिनो मानसशास्त्रस्य एकं शोभनम् अध्ययनमेव। वैद्यकव्यवसायः, प्रान्तान्तरीयविवाहस्य पुरस्कारः, युरोपीययुवतिभिः सह विवाहनिषेधः इत्यादयो विषया अपि अत्र विवेचिताः सन्ति।

सकृत् प्रतिष्ठितः कारागारीयः कार्यकलापः क्वचिदेव अन्यथाभवति। सावरकराणाम् एकतः तन्तुकुट्टनम्, कदन्नभक्षणम्, तन्निमित्तकं श्रमातिरेकजं च प्रत्यहं वर्धमानं प्रकृत्यस्वास्थ्यम्, प्रियजनविरहजं पर्युत्सुकत्वम् इत्यादिरूपः अपरिहार्यः जीवितक्रमः आसीत्। अन्यतश्च स्वेच्छया

अङ्गीकृत: अशिक्षितानां बन्दिनां साक्षरीकरणम्, शिक्षिता-नाम् इतिहास-राज्यशास्त्रादि-पाठदानम्, धर्मान्तरप्रविष्टानाम् पुनर् हिन्दुधर्मे परावर्तनम्, सर्वेषां संघटनं प्रबोधनं च इत्यादिकः विधायकः कार्यकलापः । कविताप्रणयनं च तेषां स्वभावभूतमेव । एतच्च सर्वं चोरितकेन ! एवं त्रिविधकार्यपराणां तेषां १९१३ ख्रिस्ताब्दः युगायमानोऽपि यथाकथंचित् समाप्तः । १९१४ ख्रिस्ताब्दस्य फेब्रुअरी २ दिने तैः द्वितीयं पत्रं प्रेषितम् । प्रेषितानि वेदान्तपुस्तकानि प्राप्तानि इति निवेद्य तत्प्रसङ्गेन तैरेवं उक्तं यत् संपन्नजीविताः पाश्चात्या एव वेदान्ते अधिकारिणः, न शूद्रप्राया भारतीयाः ।

प्रथमं महायुद्धम्

एतदुत्तरं कैश्चिदेव मासैः एका जगत्क्षोभिणी घटना बभूव या अज्ञातवासगतम् अण्डमानीयं जगदपि अनल्पं क्षोभंयामास । सा नाम प्रथमं महायुद्धम्, यद् ऑगस्ट–मासे प्रारभत । इतश्च सोऽवसरः प्राप्तः यं प्रतीक्षमाणाः क्रान्तिकारकाः वर्षानुवर्षाणि स्वातन्त्र्यसमर-सिद्धतायां व्यापृता आसन्, इतश्च तेषाम् अद्वितीयो नेता एकान्ते निगडबद्धः आसीत् । अस्याम् अवस्थायां सावरकरमनसि उत्थितः विचारकल्लोलः सहृदयैर् वाचकैः स्वयम् उन्नेयः । नेतरि निगृहीतेऽपि सावरकरानुयायिनः न शयाना आसन् । लाला हरदयालः, राजा महेन्द्र–प्रतापः इत्यादयः क्रान्तिकारकाः युरोपं प्रागेव गताः आसन् । शार्मण्यराष्ट्रधुरीणैः सह तेषाम् उपजापाः संजाता आसन् । बर्लिन नगरे एका ‘भारतीय-स्वातन्त्र्य-समितिः’ स्थापिता आसीत् । सेप्टेम्बर–मासे गङ्गासागरे संचर्य यया अनेका आङ्ग्लीया युद्धनौकाः मज्जिताः, मद्रासोपरि च गोलिका-वर्षणं कृतम्, सा शार्मण्या रणतरीः ‘एमडेन’ न तत्र यदृच्छया आगता आसीत् । युरोपस्थितानां भारतीय-क्रान्तिकारकाणां शार्मण्यदेशीयैः नेतृभिः सह संजातानाम् उपजापानां हि तत् फलम् आसीत्, अण्डमानम् आस्कन्द्य तत्र निरुद्धानां सावरकर-प्रभृतीनां क्रान्तिकारकाणां विमोचनं तस्याः अन्यतरत् उद्दिष्टम् आसीत् ।

कारावद्धत्वात् सावरकराणां बहु करणं शक्यं नासीत् । शार्मण्य-राष्ट्रस्य तु प्रारम्भिकविजयकारणात्, तुर्कस्थानस्य च तस्य सहायतया,

अण्डमानीया मुसलमानजनता भारते मुसलमानराज्यस्वप्नान् द्रष्टुं प्रारभत । तस्याः स्वप्नभङ्गे तावत् सावरकराः यथाशक्ति प्रायतन्त । एकं निवेदनमपि तैः शासनाय प्रेषितम् । भारताय यदि न्यूनतोन्यूनम् औपनिवेशिकी स्वायत्तता दीयेत, सर्वे च राजबन्दिनः मुच्येरन्, तर्हि भारतीय-क्रान्तिकारकाः अस्मिन् युद्धे आङ्ग्लानां साहाय्यम् आचरेयुः इति तत्र पणबन्धः प्रस्तुत आसीत् । शासनेन तु न तत्र काऽपि आस्था उपदर्शिता ।

१९–२–१५ दिने ना. गोखले दिवं गताः । अन्यदा वार्तानिरोध-दक्षः बारी स्वयमेव इमां वार्तां सावरकरेभ्यः अकथयत् । तदानीं सावर-करैः गोखले-महाभागान् प्रति प्रदर्शितं गौरवं तु बन्दिपालेन अनपेक्षितम् आसीत् । एतदुत्तरं कैश्चिद्दिनैः प्रेषिते तृतीये वार्षिकपत्रेऽपि (दि. ९–३–१५) सावरकरैः ना. गोखलेभ्यः श्रद्धाञ्जलिः प्रदत्तः । कतिपयदिन-पूर्वं भारतं निवर्तमानस्य कस्यचिद् बन्दिनः हस्तेन तैः गुरु-गोविन्दसिंह-विषयिणी एका, रवीन्द्रनाथ ठक्कुरविषयिणी च अन्या इति कविताद्वयं प्रेषितम् आसीत् । तत्प्राप्तिम् अन्तरेणापि पत्रे पृच्छाऽस्ति ।

रवीन्द्राभिनन्दनम्

गुरु-विषयिणी कविता प्रागेव निर्दिष्टाऽस्ति । १९१३ ख्रिस्ताब्दे कवीन्द्रैः रवीन्द्रैः नोबेल-पारितोषिकम् अवाप्तम् । तदर्थं तान् सभाजयितुं सावरकरैः इयं कविता प्रणीता । महाकविना कृतं महाकवेर् अभिनन्द-नम् । किंचित् आत्माविष्करणमपि अस्यां कवितायां वर्तते । प्रियोऽपि काव्यव्यापारः राष्ट्रकार्यस्य गरीयस्त्वात् सावरकराणां दूरीकर्तव्यः आसीत् । तमिमम् अर्थं सावरकराः अस्यां कवितायाम् एतेन रूपकेण ध्वनयन्ति— भारतमातुर् हस्ते गुलाबकलिकाद्वयम् आसीत् । एका (रवीन्द्रकविता) तया निजकेशपाशस्य विभूषणीकृता; अपरा (सावर-कर-कविता) तया निजदास्यमोचनाय प्रवर्तिते यज्ञे आहुतीकृता !

महायुद्धहेतोः भारतीयसेनया सागरोल्लङ्घनपूर्वकं देशान्तरगम-नस्य, पराक्रम-प्रदर्शनस्य च अवसरो लब्धः इत्येतद्वृत्तजनितः आनन्दः सावरकरैः अस्मिन् पत्रे प्रकटीकृतोऽस्ति । सावरकराणां दीर्घद्रष्टृत्वस्य एकं प्रमाणमपि अत्र पत्रे वर्तते । तदानीम् आन्ध्रस्य मद्रासतः पृथक्कर-

णोद्देशकम् आन्दोलनम् अचिरप्रवृत्तम् आसीत् । इयं पृथक्करणप्रवृत्तिः यदि बलवती भूता, तर्हि सर्व एव प्रदेशः अन्योन्यस्मात् पृथग् भवितुम् इच्छेत्, भारतस्य एकात्मता च संशयारूढा स्यादिति भयसूचना तत्र तैः स्पष्टं कृतास्ति ।

महायुद्धे प्रचलति, भारते लाहोर, दिल्ली, वाराणसी इत्यादिषु नगरेषु तत्तन्नामप्रसिद्धाः उपजापाभियोगाः प्रचालिता अभवन् । तन्निर्णयानुसारेण पिंगळे, कर्तारसिंग प्रभृतयः वधस्तम्भम् आरोपिताः । अन्ये च भाई-परमानन्द, शचीन्द्रनाथप्रभृतयः अण्डमाने निर्वासिताः । १९१५ ख्रिस्ताब्दस्य उत्तरार्धे, १९१६ वर्षस्य च पूर्वार्धे एते निर्वासिताः अण्डमानं प्रापुः । नवागतानाम् एतेषामपि बारीप्रभृतिभिः काराधिकारिभिः सह नित्यनूतनाः कलहाः प्रारभन्त । चतरसिंग-(द्वितीय)परमानन्द प्रभृतिभिः बन्दिभिः काराधिकारिभिः सह मुष्टीमुष्टि कलहायितम् । एतेषां यद् आततायित्वम् तत् सावरकर-भ्रातृद्वयस्य प्रचोदनामूलकम् इत्युक्त्वा सावरकरानपि अत्र ग्रथितुं बारी प्रायतत । सावरकरास्तु जागरूकाः आसन् । उपायज्ञैस्तैः ते ते बारीप्रयत्ना विफलीकृताः ।

तेषाम् आरोग्यं प्रतिदिनं क्षीयमाणम् आसीत् । वार्षिकपत्रे तु तथा स्पष्टम् अनुक्तं तत् आहृतेन उत्साहेन प्रच्छादयितुं कृतः प्रयत्नो दृश्यते । ६–७–१६ दिने प्रेषिते चतुर्थे वार्षिकपत्रे ते लिखन्ति– कदाचित् सागरस्य तरङ्गाघातजनितो ध्वनिः सुप्तोत्थितस्य मम कर्णपथम् आयाति । तदानीं च—

प्रासादवातायनदृश्यवीचिः प्रबोधयत्यर्णव एव सुप्तम् ।

इति कालिदासपङ्क्ति स्मृत्वा आत्मानमपि तादृशं नृपं कल्पयित्वा अहं मनोराज्यनिरतो भवामि !

नित्यसहचरः शिशिरः

५–८–१७ दिने प्रेषिते पञ्चमे वार्षिकपत्रे 'न मच्छरीरस्वास्थ्यनिमित्तं काऽपि चिन्ता कर्तव्या' इति लिखद्भिः सावरकरैः स्वशरीरास्वास्थ्यं सूचितमस्ति । क्षणभङ्गुरस्य सुखस्पर्शस्य वशीभूय नास्माभिः सुखासक्तैर् भाव्यम्; यतः अस्मिन् पारतन्त्र्यकाले भारते जातानाम्

अस्माकं शिशिर एव नित्यसहचरः, न वसन्तः इति निजस्वभावोचितम् अप्रियसत्यसूचनमपि तैः तत्र कृतमस्ति।

तदानींपर्यन्तं गृहजनात् गोपितं प्रकृतेर् अस्वास्थ्यं ४-८-१८ दिने प्रेषिते षष्ठे वार्षिकपत्रे तु तैः स्पष्टं निवेदितमस्ति। एकेन वर्षेण तेषां गुरुत्वं ११९ पौण्डतः ९८ पौण्डपर्यन्तं ह्रसितम् आसीत्। अष्टौ वर्षाणि यथाकथमपि सोढम्, इतः परं तु सहनम् अशक्यमिव इति नैराश्यध्वनिः तत्र पत्रे स्पष्टं श्रूयते। एतत् पत्रं भारतीयेषु वृत्तपत्रेषु बह्वीं प्रसिद्धिं लेभे। लोकमान्यैः चिन्ता प्रकटीकृता। वरिष्ठे विधिमण्डले सदस्यैः प्रश्नाः पृष्टाः। न तु कोऽपि प्रयत्नः सफलः संवृत्तः। प्रावरितुम् अशक्यं देहवस्त्रं तथैव प्रावृत्य तेषाम् एकैको दिवसः पृष्ठतः सारणीयः आसीत्।

क्षणिकं पुनर्मिलनम्

१९१९ वर्षस्य मे मासे सावरकराणां प्रियजनेन सह मिलनयोगः संप्राप्तः। बहुवारं प्रयतनोत्तरम् अन्ततः डॉ. सावरकरैः (विनायकरायाणां कनिष्ठेन भ्रात्रा) सावरकरदर्शनार्थम् अण्डमानं गन्तुम् शासकीयाऽनुज्ञा समधिगता। द्वादशवर्षोत्तरं त्रयो भ्रातरः अन्योन्येन मिलिताः। न त्वयं मिलनानन्दः अनुपहत आसीत्। दर्शनागतेषु जनेषु सौ. येसू-वहिनीम अपश्यतोः गणेशपन्त-विनायकराययोः हृदयं भयकम्पितम् अभवत्। पति दर्शनार्थं नेत्रगतजीविता इयं साध्वी निराशीभूता दर्शनानुज्ञाप्राप्तेः पूर्वेद्युरेव लोकान्तरं गता आसीत्! सौ. येसूवहिनी हि सावरकराणां न केवलं भ्रातृजाया अपि तु युगपत् तेषां 'शैशवसखी, भगिनी, माता, कार्येषु च सहकारिणी' आसीत्। मिलनस्य तु एकहोरानियतत्वात् शोकनिग्रहपूर्वकं यथाकथमपि कार्यनिर्वहणं कर्तव्यम् आसीत्। सौ. माई- (यमुनाबाई)भिः सह सावरकराणां स्वातन्त्र्येण दर्शनभाषणादिकम् अर्धहोरामात्रम् अभवत्। तस्मिन्नेव दिने अगतिको गृहजनः भारतं निर्वर्तितुं नौकाम् आरूढः, सावरकरभ्रातरौ च पुनरपि स्वे स्वे अपवरके बन्दीकृतौ। यथा कश्चित् ज्वरार्तः क्षणलब्धनिद्रः मधुरं स्वप्नं पश्येत्, क्षणेनैव तु प्रतिबुद्धः सन् युगायमानां रात्रीं ताम्यंस् तिष्ठेत्, तादृशी सावरकराणाम् अवस्था समजायत।

मरणोन्मुख-शय्यायाम्

एतद्दर्शनावसरे साक्षात्कृतं सावरकराणां शारीरिकम् अस्वास्थ्यं तेषां गृहजनस्य चिन्ताविषयोऽभूत् । काराधिपदर्पदलनेन, संघटनादि-कार्येषु च सफलतया लब्धसमाधानानामपि सावरकराणां प्रकृतिः एषु दिनेषु राजयक्ष्मोन्मुखी आसीत् । आप्रातः आसायं होरानुहोरं शय्या-शरणानां तेषां कदाचित् पिपीलिकानां वल्मीकनिर्माणव्यापारेण, कदा-चित् मार्जारयोः कलहेन, कदाचित् कुक्कुटानां साटोपगमनेन, अन्यैश्च तादृशैर् विनोदैः आत्मा रञ्जनीय आसीत् । अस्याम् अवस्थायाम् उत्प्रे-क्षितागमनस्य मृत्योः सानन्द-स्वागतार्थम्

एहि, मृत्यो ! एहि
प्रस्थितश् चेत् प्रागेव, सुखेनैव एहि

इत्यारभ्य एकं दीर्घं काव्यं सावरकरैः व्यरचि । जन्मसहभुवानि ऋणानि मया प्रत्यर्पितानि सन्ति, कृतदिवसकार्यतया मम दिवसान्तभयं नास्ति, 'न हि कल्याणकृत् कश्चिद् दुर्गतिं तात गच्छति' इति भगव-दुक्तौ मम विश्वासोऽस्ति, मरण-महाद्वार-प्रवेश्ये अदृष्टपूर्वे नगरे अस्म-दर्थं रमणीयाः प्रासादाः प्रागेव स्वायत्तीकृताः सन्ति इत्याशां प्रकटीकृत्य कविः अन्ते पुनरेकवारं मृत्यवे आत्मनः सिद्धताम् आविष्करोति ।

महायुद्धं समाप्तम् । तदनन्तरं बन्दिमोचनविषयः पुनरुत्थितः । मुक्तानां बन्दिनां मध्ये देवतास्वरूपाः भाई-परमानन्द महाभागाः आसन् । तैः संकोचितमनस्कैः साश्रुनेत्रैश्च सावरकराः आपृष्टाः । सावरकरैश्च ते प्रीतिपुरःसरं प्रस्थापिताः । एकं तु सौकर्यं सावरकरैः लब्धम् । तेषां श्रमिकं कार्यं समाप्तम् । तत्स्थाने अधुना तैः लेखनकार्यं लब्धम्, कतिप-यैश्च दिनैः ते तैलसंचयविभागे पर्यवेक्षका अभवन् । एतत्-स्थानमाहा-त्म्यवशात् अधुना ते कारागारीयाणां अधिकारिणाम् अपि भयचकित-प्रणामास्पदं जाताः । बारी-राज्यमपि अधुना समाप्तमासीत् ।

एवं किंचिदिव आनुकूल्यं दर्शयितुं प्रवृत्ते दैवे, लोकमान्य-टिळकानां निधनवार्ता द्वितीयदिने (२–८–२०) अण्डमानं प्राप्ता । एतद्दुःख-प्रदर्शनार्थं सर्वैर् उपवासः कर्तव्यः इति सावरकरैः सूचितम्, तच्च सर्वैः ऐकमत्येन अङ्गीकृत्य समनुष्ठितम् । लोकमान्यानां निधनोत्तरम् असह-

कारस्य पदे पदम् अर्पयत् खिलाफत-आन्दोलनमपि आगमत् । तस्य प्रतिवादं कुर्वतां सावरकराणाम् ‘नेयं खिलाफत, इयं तु आफत (आपद्)’ इति सूत्रभूतं वाक्यम् अण्डमाने सर्वेषां जिह्वाग्रनर्तकं बभूव ।

यतः प्रभृति महायुद्धं समाप्तम्, तत आरभ्य सावरकरमोचन-प्रयत्ना अनेकैः आस्थिता आसन् । लोकमान्यैः आङ्ग्लभूमौ प्रयतितम् आसीत् । विठ्ठलभाई-पटेल महोदयैः वरिष्ठे विधिमण्डले तदर्थकः प्रस्तावः पुरस्कृत आसीत् । मुम्बापुरीयया नॅशनल यूनियन इत्याख्यया संस्थया ७०,००० स्वाक्षरीयुक्तं प्रार्थतापत्रं प्रेषितम् । स्वयं सावरकरैरपि अनेकानि निवेदनानि प्रेषितानि । गान्धि-महात्मनापि यङ्ग-इण्डिया पत्रे सावरकरसमर्थनं कृतम् । एतेषाम्, एतत्सदृशानाम् अन्येषां प्रयत्नानां च फलरूपतया शासनं सावरकरविषये पुनर्विचारानुकूलम् अभवत् । तेषां कण्ठावलम्बिनी ‘भयंकरापराधित्व’ सूचिका मुद्रा २१–१–२१ दिने अपसारिता। कतिपयैश्च दिनैः सावरकर-भ्रात्रोः भारतप्रेषणरूपः शासन-निर्णयः विदितोऽभूत् । वस्तुतस्तु सावरकराणाम् इदं नैव इष्टम् आसीत् । वरम् अण्डमाने मर्यादितमपि स्वातन्त्र्यम्, न तु भारतीय–कारागृहे कात्स्न्र्येन बन्दिभावः इति हि तेषां मतम् आसीत् । तथापि का गतिः ? वसन्तर्तौ एकस्मिन् सुप्रभाते बन्दिबान्धवान् आपृच्छ्य, तेषाम् अन्यतमेन प्रतिनिधिना कण्ठे प्रतिमुक्तां वन्यपुष्पाणां मालां स्वीकृत्य, दशवर्षेभ्यः पूर्वं यं प्रवणम् आरुह्य सावरकराः अण्डमानीयं कारागृहं प्रविष्टा आसन्, तमेव अधुना अवतर्तुं ते प्रारभन्त !

शत्रूणाम् आशाः मित्राणां च आशङ्का वितथीकृत्य, रामचन्द्र इव लङ्कातः, अण्डमानतः सावरकराः पुनरपि भारतं प्रतिप्रस्थिताः । दिव्य-मिव किमपि अनुष्ठाय । किमिव न कृतम् तत्र तैः ? राजबन्दिनाम् अधिकारार्थं कलहायितम् । उद्दामानां काराधिकारिणां दर्पभङ्गः कृतः । अशिक्षिता बन्दिनः साक्षरीकृताः, क्वचित् साम्ना वशीकृत्य, क्वचिच्च दानेन । तेषु च राष्ट्रभक्तिः जागरिता । सुशिक्षिता राजबन्दिनः क्रान्ति-शास्त्रम् अध्यापिताः । हिन्दूनां यवनीकरणं निरुद्धम् । यवनीभूताः पुनर् हिन्दुत्वं प्रापिताः । अनेकसहस्रश्लोकमिता कविता रचिता । एतद्-’अपराध’कृते दण्डोऽपि सोढः । धैर्यं प्रदर्शितम् । तितिक्षा परिचायिता

व्यवहारज्ञता प्रकटीकृता । उपायज्ञता उपदर्शिता । न खण्डिता तेषां ध्येयनिष्ठा । न भग्ना च धृतिः । कर्मयोगः कर्मयोग इति उच्यते, स किम् इतोऽपि अन्यः ? इयं प्रत्युत चरमसीमा कर्मयोगस्य ।

प्रस्थानोत्तरं चतुर्थदिने भारतस्य तटः दृक्पथम् आगतः । "भारतस्य तटः !" लिखन्ति सावरकराः, "यस्याः प्रियमातृभूमेः स्मरणमात्रेण जातस्फुरणतया अनेका यातनाः सोढाः, तस्याः साक्षाद् दृश्यमाना मूर्तिः ! पुनरपि तच्चरणयुगलं दृष्टम् ! अस्मिन्नेव आयुषि ! परिवृत्य ज्येष्ठभ्रातरम् अवदम्– 'बाबा ! पश्य ! एष भारतः ! पश्य अस्य तत् नील-सिन्धुजल-धौत-चरणतलम् ।' उभावपि आवां भक्त्युन्मेषेण पुलकिततनू उत्थाय मातृभूमेः चरणपुरतः अञ्जलिं बद्ध्वा जयशब्दम् अगृणीव –

'विजयतां स्वातन्त्र्यलक्ष्मीः । वन्दे मातरम् ।' "

* * *

८. स्वातन्त्र्यम् – वैयक्तिकं राष्ट्रियं च

१९२१ वर्षस्य मे मासे भारतम् आनीय सावरकराः अलीपुर-कारागृहं नीताः, ततश्च कतिपयैः दिनै रत्नागिरि-कारागृहे स्थापिताः । तत्र च ते सार्धं वर्षद्वयम् आसन् । सर्वेषां कारागारीय-बन्धनानां पुनरागततया 'वरम् अण्डमाने निर्वासनम्, न तु अयं भारते कारावासः' इत्यपि तेषां मनसि आगतम् । एकदा च पुनरपि आत्मघातविचारः बलीभूतः । पुनरपि च ते विवेकबलेन आत्मानमात्मना संस्तम्भितवन्तः ।

अण्डमान-कारागृहे प्रारब्धं स्वीकृतधर्मान्तराणां शुद्धीकृत्य हिन्दुत्व-प्रापणं रत्नागिरि-कारागृहेऽपि तैः तथैव प्रवर्तितम् । तदर्थं तेषां न केवलं 'शठं प्रति शाठ्यम्' किंतु 'दण्डं प्रति दाण्डचम्' नीतिरपि अवलम्बनीया

आसीत्। अथैकदा सावरकराणां शुद्धीकरणव्यापारेण जातरोषा मुसलमान-बन्दिनः तान् सशस्त्राः आक्रामन्। सावरकराणां जागरूकत्वात्तु शस्त्राघातस्य सशस्त्रः प्रत्याघातः स्वागतीभूतः। तदाप्रभृति अधिकारिभिः कारागारे धर्मान्तरकरणं प्रतिषिद्धम्, व्यजयत च सावरकरमतम्।

तेषां केचन ग्रन्था अस्मिन्नेव काले प्रकाशं गताः। तेषां कारावद्धत्वात् तु वास्तवं ग्रन्थकर्तृत्वं गोपयित्वा कृत्रिमसंज्ञयैव ग्रन्थाः प्रकाशिताः। तथा हि **गोमान्तक**-काव्यं 'महाराष्ट्र-भाट' इति लेखकनाम्ना, **कमला** 'विजनवासी' इति नाम्ना, **हिन्दुत्वम्** च 'मराठा' इति नाम्ना प्रकाशितम्। अन्तनिर्दिष्टो ग्रन्थः हिन्दुत्व-वादस्य प्रस्थानभूतोऽस्ति। अण्डमाने प्रागेव एतेन विषयेण सावरकराणां मनः आकृष्टम् आसीत्। १९२१ खिरस्ताब्दे मलबार-प्रदेशे संजातेन मोपला-विप्लवेन अस्य विषयस्य महत्त्वं विशदीकृतम्। अतः सावरकरैः

आसिन्धुसिन्धुपर्यन्ता यस्य भारतभूमिका।
पितृभूः पुण्यभूश्चैव स वै हिन्दुरिति स्मृतः॥

इति हिन्दुलक्षणं विधाय तस्य व्याख्यानरूपेण ग्रन्थोऽयं लिखितः। अस्य ग्रन्थस्य तर्कशुद्धतया लाला लजपतराय-सदृशाः महान्तोऽपि प्रभाविताः अभूवन्, तदानींपर्यन्तम् अलब्धं भारतीयराष्ट्रियताकूटस्य समाधानं च तैः लब्धम्। 'येन उषोदर्शनेन प्रेरितायां मन्त्रद्रष्टृणां प्रतिभायाम् उषःसूक्तानि स्फुरितानि, नूनं तेनैव उषोदर्शनेन लब्धस्फुरणा सावरकर-प्रतिभा **हिन्दुत्वम्** व्यरीरचत्' इति च अवादिषुः स्वामिनः श्रद्धानन्द-महोदयाः।

१९२३ खिरस्ताब्दस्य समाप्तौ प्रत्यासन्नायां सावरकराः रत्नागिरितः येरवडा-कारागृहं नीताः। ततश्च ६–१–२४ दिने पञ्च वर्षाणि राजकीयं कार्यं न कर्तव्यम्, रत्नागिरि-मण्डलाच्च बहिर् न गन्तव्यम्' इति समयपूर्वकं ते कारागृहात् मोचिताः।

रत्नागिरौ स्थानबद्धता —

स्थानबद्धाः सावरकराः रत्नागिरौ सार्धत्रयोदश वर्षाणि अवसन्। अत्र राजकीयव्यापारस्य निरुद्धतया तैः सामाजिकं कार्यं प्रारब्धम्।

जातिभेदभिन्नस्य हिन्दुसमाजस्य ऐकात्म्य-संपादनार्थं तैः अस्पृश्यता-निवारणं प्रारब्धम् । तदर्थम् अन्यतमोपायत्वेन 'जात्युच्छेदनार्थं सह-भोजनं करिष्ये ' इति संकल्पं विरचय्य सहभोजनानि आयोजितानि । 'पतितपावनमन्दिरम्' निर्मापितम्। शुद्धीकृतस्य कस्यचित् पुरुषस्य दुहितुः विवाहे कन्यादानमपि स्वयं सावरकरैः कृतम् । श्रद्धानन्द-किर्लो-स्कर-मासिकयोः अनेकान् लेखान् विलिख्य तैः जीर्णरूढिषु प्रहाराः कृताः । अन्धश्रद्धाः आक्रान्ताः । बुद्धिवादः पुरस्कृतः । यन्त्रयुगम् अभिनन्दितम् । विज्ञाननिष्ठा पुरस्कृता । भाषाशुद्धेर् आन्दोलनमपि तैर् अस्मिन्नेव काले प्रारब्धम्, यच्च तदानीं पण्डितंमन्यैर् उपहसितमपि अधुना स्वीकृत-प्रायम् अस्ति, सावरकराणां दीर्घदर्शितां च प्रमाणयति ।

तेषां **उःशाप** (अस्पृश्योद्धारप्रतिपादकम्), **उत्तरक्रिया** (पानपत-समरस्य संदेशदायकम्) तथा च **संन्यस्तखड्ग** (आत्यन्तिक्याः अहिं-सायाः दुष्परिणामप्रतिपादकम्) इति नाटकत्रयस्य लेखनम् अस्मिन् काले अभवत् । भारतस्य इतिहासो नाम हिन्दुराष्ट्रस्य उत्थानपतनयोर् इतिहासः इति आत्मनः सिद्धान्तस्य प्रतिपादनार्थं **हिन्दुपदपातशाही** इत्याख्यो ग्रन्थोऽपि तैर् अस्मिन् स्थानबद्धताकाले प्रणीतः । आत्मनः अण्डमानीयजीवितस्य कथा तैः **माझी जन्मठेप** इत्याख्ये ग्रन्थे लिखिता । पश्चात् शासनेन एतत्पुस्तके प्रतिषिद्धे, तैः तस्यैव आशयः **काळें पाणी** इत्याख्ये पुस्तके भङ्ग्यन्तरेण प्रकटीकृतः ।

स्थानबद्धत्वात् मुक्तता--

पञ्चसु वर्षेषु व्यतीतेष्वपि शासनेन न सावरकरा मुक्ताः, न वा तेषाम् अमुक्तिकारणानि प्रदर्शितानि । गच्छता कालेन १९३७ ख्रिस्ताब्दे 'कूपर-मेथा' मन्त्रिमण्डलं तदानींतने मुम्बापुरी-प्रदेशे सामयिकतया अधिकारान् आददे । जमनादास मेथा हि सावरकर-विमोचन-समितेः अध्यक्षाः आसन् । तेषां प्रयत्नवशात् ८-५-३७ दिने सावरकराः कार्त्स्न्येन मुक्ताः ।

मुक्तमात्रैः सावरकरैः राजकीयकार्येषु उत्पतितम् । तन्मतेन हिन्दु-त्वस्यैव राष्ट्रियत्वात् ते हिन्दुमहासभां प्राविशन् । अनेकानि वर्षाणि हिन्दुसभायाः अद्वितीयम् आध्यक्ष्यम् अलंकुर्वद्भिः तैः स्वीयमतानां झञ्झा-

वातायमानः प्रसारः कृतः। आत्मनः ध्येय-साधन-पक्षाणां संग्रहः तैरेव

राष्ट्रस्वतन्त्रता ध्येयं यथासाध्यं च साधनम्।
अभ्युत्थानाय हिन्दूनां पक्षोऽयं संप्रवर्तितः ॥

इति स्वरचिते श्लोके कृतोऽस्ति।

१९३८ खिस्ताब्दे मुम्बापुर्यां मराठी-साहित्य-संमेलनं तेषाम् आध्यक्ष्ये समपद्यत। तत्र च 'खण्डयत लेखनीः, स्वीकुरुत खड्गान्' इति साहित्यिकजनान् उद्दिश्य तैः कृतः उपदेशः बहुविवादास्पदं बभूव। शस्त्रस्वातन्त्र्यार्थमपि तैः प्रचारः प्रारब्धः। अस्मिन्नेव संवत्सरे भागानगर-(हैद्राबाद)संस्थानगतायाः हिन्दुजनतायाः नागरिकाधिकार-लाभार्थं तैः आन्दोलनं प्रारब्धं, द्वितीये महायुद्धे च प्रारब्धे समयज्ञतया तत् समापितम्।

ममापि एका वल्गना–

एषु दिनेषु सावरकराणां प्रकटभाषणानि नाम जनानां – विशेषतः पुण्यपत्तनीयानाम् – मिष्टान्नभोजनानि आसन्। १–९–३९ दिने लोकमान्य-पुण्यतिथिसमये तैः दत्तं भाषणं बहु पप्रथे। तस्मिन् भाषणे यावत्पर्यन्तं मम राष्ट्रसिंहासने परकीयो नृपः – नेपोलियनः— अध्यास्ते, मम आत्मीयो राजा निर्वासितोऽस्ति, तावत्पर्यन्तम् अहं भिक्षाम् अटिष्यामि इति गटे-कविना तदानीं कृता वल्गना अद्य चतुष्पञ्च-पुरुषायुषोत्तरं सत्यीभूता इत्युक्त्वा सावरकराः अवोचन् –

> ममापि एका वल्गनाऽस्ति। ममापि एकं गीतं गेयमस्ति। यदि वयं हिन्दुरूपेण सगौरवं राष्ट्रजीवनं जीवितुम् इच्छामः– अस्त्येव तादृशः अस्माकम् अधिकारः– तर्हि तादृशं राष्ट्रं हिन्दुध्वजस्यैव अधस्तात् निर्माणम् अपेक्षते। माऽस्तु अस्मिन् पुरुषायुषे, अन्यमिन् पुरुषायुषे तावद् इयं मे वल्गना सफला भविष्यति। यदीयं वितथीभूता, अहं 'उन्मत्त'शब्दभाग् भवेयम्। यदि तु सत्या संपन्ना, अहं 'प्रॉफेट्' भवेयम्। एषोऽहमिदं रिक्थं युष्मभ्यं संप्रददे।

१९३९ खिस्ताब्दे द्वितीयं महायुद्धं प्रारब्धम्। तस्मिन् प्रारब्धे सावरकरैः सैनिकीकरणस्य डिण्डिमः प्रताडितः। अज्ञाततद्रहस्यानां

नीतिज्ञंमन्यानाम् उपहासोऽपि तैः सोढः। अग्रे 'अस्माकं स्वातन्त्र्य-सैनिकलाभः सावरकराणां सैनिकीकरणप्रचारमूलकः' इति प्रशस्तिपत्रं प्रददद्भिः देशगौरवैः सुभाषचन्द्र-वसुभिः एतेषाम् उपहासकानां तुण्ड-खण्डनं कृतम्। न केवलं सावरकरैः सैनिकीकरणप्रचारः कृतः। अग्रे १९४१ ख्रिस्ताब्दे यत् सुभाषचन्द्राः निभृतं भारतं परित्यज्य वहिर्गताः, यच्च आङ्ग्लदेशस्य शत्रुभिः सह संधाय तैः स्वातन्त्र्यसेना निर्मिता, स्वातन्त्र्ययुद्धं च प्रारब्धम् तत्रापि तैः मुम्बापुर्यां चर्चावसरे सावरकर-सकाशात् लब्धा प्रेरणैव कारणम् इति जानन्त्येव अधुना अभियुक्ताः।

१९४३ ख्रिस्ताब्दे सावरकराः आयुषः एकषष्टितमे वर्षे पदम् अर्पितवन्तः। सोऽयं तेषां षष्टयब्दपूर्तिमहोत्सवः महाराष्ट्रे सोत्साहम् समपद्यत। तेषां राष्ट्रसेवायाः स्वीकृतिपत्रमिव समाजेन प्रदत्तम्।

द्वितीयमहायुद्धस्य अन्ते दृष्टिगोचरताम् आगते, अधिकारसंक्र-मणनिमित्तं राज्यकर्तॄणां नेतृभिः सह, नेतॄणां च अन्योन्यं मन्त्रणाः अभवन्। क्रिप्स-महोदयेन सह चर्चावसरे 'प्रदेशानां स्वयंनिर्णयाधिकारो माऽस्तु' इति स्वीयं मतं सावरकरैः प्रकटितम्। पश्चात् १९४४ ख्रिस्ताब्दे गान्धी-जिना-मन्त्रणावसरे 'हिन्दुसभा भारतभङ्गं न सहि-ष्यते' इति तैः उद्घोषितम्। उत्प्रेक्षितागमनस्य पाकिस्तानस्य विरो-धार्थं तैः दिल्ल्याम् एका 'अखण्डभारत-परिषद्' अपि निमन्त्रिता।

नासीत्तु सावरकराणां पृष्ठे काँग्रेस-सदृशी अखिलभारतव्यापिनी संघटना। तेषु तेषु निर्वाचनेषु काँग्रेस विजयिनी अभवत्। पाकिस्तान-निर्मितिः निश्चिताऽभवत्। तदानीं न्यूनतोन्यूनं समग्रौ वङ्गपञ्चाम्बु-प्रदेशौ पाकिस्तानगिलितौ मा भूताम् इति सावरकरैः प्रयतितम्। जिनामहोदयः 'कृमिभक्षितं' पाकिस्तानम् अलभत।

स्वातन्त्र्यं समुपागतम्—

१५–८–४७ दिने भारतः स्वतन्त्रः संजातः। अनेकेषां ज्ञाताज्ञातानां राष्ट्रभक्तानां तपस्या सुफलिता अभवत्। सावरकराणां स्वप्नः साकारोऽ-भवत्। भारतस्य तु चतुर्थांशः अधुना पाकिस्तानपरवशोऽभवत्। तद् दुःखं निगिल्य अवशिष्टस्य भारतस्य स्वातन्त्र्यं तैः अभिनन्दितम्।

स्वातन्त्र्यदिने हिन्दुसभीयः, तथैव च राष्ट्रियः इत्युभौ अपि ध्वजौ तः निजसदने आरोपितौ ।

स्वातन्त्र्यं समुपागतम् । क्व तु स्वातन्त्र्यवीरस्मृतिः ? न केवलं ते उपेक्षाभाजनम् अभवन्, प्रत्युत स्वतन्त्रभारतस्य न्यायालये हत्याकारितया अभियुक्तत्वेन स्थानं तेषां विधिलिखितम् आसीत् । अहो दैवदुर्विलसितम् ! गान्धिमहात्मनः ३०–१–४८ दिने या हत्या संजाता, तस्याः अयमेव प्रचोदयिता इति बुद्ध्या सावरकरा निगृह्य बन्दिग्राहं गृहीताः, अन्यतमाभियुक्ततया च तदुपरि अभियोगः प्रारब्धः । दिष्टया तु न्यायाधीशेन सावरकराणाम् अणुमात्रोऽपि दोषो नास्ति इति निर्णीय निष्कलङ्कतया ते मोचिताः । हिन्दुजनतया समाश्वसितम् ।

इयं तु स्वजनानां कृतघ्नता तेषां मनसि कामपि व्यथाम् अजनयत् । ततः प्रभृति अंशतः प्रकृतेर् अस्वास्थ्यात्, अंशतश्च उद्वेजिततया ते क्रमशः अधिकाधिकम् अन्तर्मुखाः संवृत्ताः, अज्ञातवासप्रायं च जीवितम् अजीवन् । प्रसङ्गविशेषे तु समुपस्थाय व्याख्यानदानेन वा, पत्रकप्रकाशनेन वा, नेतृऋन् संदेशप्रेषणेन वा तैः जनानां मार्गदर्शनं कृतम् ।

वैनायकं सिन्धुसूक्तम्—

१९५२ खिरस्ताब्दे तैः 'अभिनवभारत' संस्थायाः साङ्गतासिद्धिरूपं विसर्जनं कृतम्, स्वीयाश्च सहकारिणः शपथबन्धात् मोचिताः । एतत्प्रसङ्गे सावरकरैः यद् भाषणं कृतम् तत् तेषाम् अजरामरेषु भाषणेषु अन्यतमं वर्तते । भारतस्वातन्त्र्यलाभेन ध्येयसिद्धौ सत्यामपि एकं हृदयशल्यम् अवशिष्यते, यावत्पर्यन्तं सिन्धुः परवशा तावत्पर्यन्तम् निरर्थः 'हिन्दु' शब्दः इति प्रतिपादयन्तः सावरकराः इदं सिन्धुसूक्तम् उदगायन्—

'गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् संनिधिं कुरु' ।

इत्येतन्मन्त्रे आहूता सा गङ्गा, सा यमुना, सा गोदावरी, सा सरस्वती, सा नर्मदा, सा कावेरी— एता अस्माकं पुण्यसरितः विमुक्ता विशुद्धाश्च भूत्वा अस्मिन् भारतीये महाराज्ये अद्य समाविष्टा दृश्यन्ते । कथं तु एतासु पुण्यसरित्सु न दृश्यते सिन्धुः ? कुत्रास्ति सिन्धुः ? हा धिक् ! अद्यापि वयं सिन्धुहीना एव स्मः ।

किं ब्रूथ ? विस्मर्यतां सिन्धुरिति ? न। तन्न। यदि सर्वं जगत् अस्मान् द्विष्यात्, यदि वा सर्वं जगत् अस्माकं द्वेष्टव्यतां गतम्, तथापि न वयं सिन्धुसंबन्धं विच्छेत्स्यामः। सिन्धुर् विस्मर्तव्या ? सिन्धुं विना हिन्दुः ! अर्थं विना शब्दः ! प्राणं विना कलेवरम् ! अशक्यम्, भोः अशक्यम्। यावत्पर्यन्तम् एकोऽपि हिन्दुः ध्रियते, अशक्यं तेन सिन्धुविस्मरणम्।

यस्याः तटे अस्माकं प्राचीनतमैर् वेदर्षिभिः ऋचाम् आद्यं सामगायनं कृतम्, यस्याः पुण्यसलिलैः ते सन्ध्यावन्दनकाले अर्घ्यान् दत्तवन्तः, यस्यै च वैदिकदेवतासु स्थानं प्रदाय तैः ताम् उद्दिश्य सुन्दरात् सुन्दरतराणि सूक्तानि विरचितानि, तां त्वां 'हे अम्बितमे ! नदीतमे ! देवितमे !' न वयं कदापि विस्मरिष्यामः।

धर्मान्तरं नाम राष्ट्रान्तरम्—

ख्रैस्त-धर्मप्रचारकाणां व्यापाराणां दुष्परिणामान् प्रति जनानां चित्तम् आक्रष्टुं तैः अधुना प्रारब्धम्। तैश्च प्रणीतस्य 'यद् धर्मान्तरं तद् राष्टान्तरमेव' इति सूत्रस्य सत्यता अधुना विद्वद्भिः अङ्गीकृताऽस्ति। १९५७ ख्रिस्ताब्दे भारते १८५७ वर्षीयस्य स्वातन्त्र्यसमरस्य शतसांवत्सरिकोत्सवः संपन्नः। शासनेनापि प्रोत्साहिते अस्मिन् उत्सवे संमिलितुं ते दिल्लीनगरं गताः। एतदुत्थानस्य स्वातन्त्र्यसमरत्वमपि अधुना प्रायः सर्वैः अङ्गीक्रियते। १९५८ वर्षे तेषाम् आयुषः पञ्चसप्ततिपूर्तिनिमित्तकः अमृतोत्सवः जनैः महता प्रेम्णा अनुष्ठितः। पुणे-विद्यापीठेन तेभ्यः संमाननपूर्वकं डी. लिट्-उपाधिः समर्पितः। मुम्बई-विद्यापीठेन प्राक्-प्रतिसंहृतः बी. ए. उपाधिः तेभ्यः पुनरर्पितः। १९१० ख्रिस्ताब्दे तैः ५० वर्षाणां निर्वासनदण्डः आसादितः आसीत्। तमेतं दण्डावधिं ते अतिजीविताः इति हेतुना १९६० वर्षे तेषां मृत्युंजय-दिनं उत्साहभरेण सर्वत्र समनुपालितम्। १९६१ वर्षस्य जानुअरी-मासे ते पुण्यपत्तनम् गत्वा पानिपतसमरस्य द्विशताब्दमहोत्सवे संमिलिताः। अस्मिन् अवसरे तैर्यद् भाषणं दत्तम्, तद् अन्तिममेव स्यात्। न जनेन सावरकराः विस्मृताः, अद्यापि ते जनस्य हृदयसिंहासनम् अधितिष्ठन्ति, इति सिद्धम् अभवत्।

१९६२ खिस्ताब्दे चीनैः भारतोपरि आक्रमणं कृतम् । 'भारतस्य सीमाः निश्चिताः कुरुत, कोटिसैन्यं च सततं सज्जं स्थापयत' इति स्वातन्त्र्यप्राप्त्यवसर एव यत् सावरकरैः उक्तमासीत् तस्य युक्तता अधुना प्रतीता । स्वभाव एवायम् अस्माकं यत् संदीप्ते भवने कूपखननं नाम !

साधु ! गच्छताग्रतः

पश्चात् १९६६ वर्षे पाकिस्तानेन सहापि भारतस्य युद्धं प्रारब्धम् । अस्मिन् युद्धे एकम् आश्चर्यं संवृत्तम् । आधुनिके काले भारतेन प्रथममेव आक्रमणसाहसं प्रकटीकृतम् । भारतसीमाम् उल्लङ्घ्य लाहोरम् उद्दिश्य भारतीयसेना प्रधाविता । समाचारमिमं शृण्वतां मरणोन्मुख-शय्याशरणानां सावरकराणां मनसि कापि आनन्दलहरिः उच्छलिता । 'साधु! इत्थमेव पदात् पदम् अग्रतः सरत' इत्येव तैः संदिष्टम् ।

मन्ये अयमेव तेषाम् आयुषि अन्तिमः आनन्दक्षणः आसीत् ।

* * *

९. महासमाधिः

१९६६ खिस्ताब्दः आगतः । महापुरुषान् कवलयितुं कालपुरुष एव प्रवृत्तः । महामन्त्री लालबहादुरः तस्य प्रथमो बली अभवत् ।

इतः कतिपयेभ्यो मासेभ्यः प्रभृति कश्चिद् विचारः सावरकराणां मनसि वारंवारम् आयातुं प्रवृत्तः । तेषां जीवितस्वप्नः प्रागेव साकारीभूत आसीत् । राष्ट्रेण स्वातन्त्र्यम् आसादितम् आसीत् । तेषां जीवितकार्यं समाप्तमासीत् । तत्कृते यावन्मात्रं कर्तव्यम्, तत् सर्वं तैः कृतमासीत् । किमधुना देहेन धृतेन ? न केवलं सः अनुपयोगी, प्रत्युत जराजर्जरः व्याधिग्रस्तश्च सः भारभूतः संजात आसीत् । तेषां सहधर्मिणी, तथा च उभौ भ्रातरौ, सर्वे प्रागेव स्वर्गता आसन् । सावरकरैः निर्णीतम्

—अयं देहः उत्स्रष्टव्यः। किमियम् आत्महत्या न स्यात् ? नेत्याहुः सावरकराः, १९६४ डिसेम्बर-मासीये 'सह्याद्रि'पत्रिकायां प्रकाशिते लेखे, 'या वैफल्यमूलिका सा आत्महत्या। यत् तु साफल्यमूलकं तद् आत्मार्पणम्'। सावरकराणां स लेखः सामान्येन प्रतिपादनपरः आसीत्। नासीत् कापि स्वनिर्णयघोषणा। तथापि 'अनुक्तमप्यूहति पण्डितो जनः।

१९६६ वर्षम् आगतम्। प्राक् कृतं निर्णयम् अधुना शीघ्रमेव कार्यान्वितीकर्तुं ते प्रवृत्ताः। किमासीत् तात्कालिकं कारणम् ? ताश्कन्द-संधिः ? देवो जानाति। सावरकरैः योजनानुसारम् आहारः परित्यक्तः। पश्चात् औषधं त्यक्तम्। पश्चात् चहापानं त्यक्तम्। अन्ते च जलमपि। दर्शनं परिहरन्निव मृत्युः तैः २२-२-६६ दिने करेग्राहम् आकृष्य आनीतः। मित्रमिव आलिङ्गितः। तस्मै च पञ्चदशीकाराणां श्रीविद्यारण्यस्वामिनां

धन्योऽहं धन्योऽहं, कर्तव्यं मे न विद्यते किंचित्।
धन्योऽहं धन्योऽहं, प्राप्तव्यं सर्वमद्य संपन्नम्।

इति वचनद्वारा निजां कृतार्थतां प्रकटय्य आत्मा समर्पितः।

एकम् अद्भुतं जीवितं समाप्तम्। एकं ध्येयार्पितं जीवितं समाप्तम्। एकं कृतार्थं जीवितं समाप्तम्।

कश्चित् झञ्झावातः निस्तब्धः। उदग्रवेगो जलप्रपातः विरतः। धडधडायमानं स्थण्डिलं निर्वाणम्। ज्वालामुखः पर्वतः शीतीभूतः।

न द्रक्ष्यते अतः परम् अयं सावरकराख्यः चमत्कारः। हौतात्म्यं यस्य स्थायी भाव आसीत्। स्वातन्त्र्यं धर्म आसीत्। युयुत्सुता स्वभाव आसीत्। यस्य वपुः काञ्चन-पद्मनिर्मितमिव आसीत्! यस्मै विधात्रा कवेर् हृदयं प्रदत्तम्, शास्त्रज्ञस्य मस्तिष्कं प्रदत्तम्, वीरस्य च बाहू प्रदत्तौ। सर्वंसहया वसुंधरयेव निजा तितिक्षा येन सह संविभक्ता, दधीचिमुनिना हौतात्म्यं संविभक्तम्, मेरुपर्वतेन धीरोदात्तता संविभक्ता, वाचस्पतिना च वाचस्पत्यं संविभक्तम्। हा ! कुतः श्रोष्यते अधुना तत् निष्प्राणदेहेऽपि प्राणधर्मं अनन्यादृशं वक्तृत्वम्! इदमेव तु मनो दुनोति—ईदृशीं गुणसामग्रीं निजस्वभावविरुद्धं एकत्र सृष्टवान् विधाता कथमिव तत्र सिद्धिकिरीटं स्थापयितुं व्यस्मरत् ?

राजकीयव्यापारबहुलमपि न तदेकसर्वस्वं सावरकर-कार्यम्। महाकविगणनाप्रसङ्गे तेषामपि नाम्ना कनिष्ठिका अधिष्ठिता भविष्यति। तेषां समाजपरिवर्तनव्यापाराः तान् समाजपरिवर्तकानां धुरि स्थापयेयुः। तत्त्वचिन्तकानां परिषदः आध्यक्ष्यम् अलंकर्तुमपि ते अलम्। कथं नाम इतिहासोऽध्येतव्यः इति विषये ऐतिहासिका अपि तेषां सकाशात् द्वित्रान् वस्तुपाठान् अधीयेरन्। परिस्थितिश्चेद् अन्यथा अभविष्यत्, श्रीअरविन्दादीनां मार्गगा भूत्वा ते योगिराजोऽपि अभविष्यन्। तेषां योगेनान्ते तनुत्याग एव अत्र निदर्शनम्। शोभादर्श (कॅलेडोस्कोप) इव अनन्तवैविध्यं तेषां जीवितम्। काल एव तस्य सर्वासां सौन्दर्यव्यक्तीनां स्फुटीकरणे समर्थः।

कालेन च विनश्येयुः तद्गताः केचन दूषिताः पूर्वग्रहाः। राष्ट्रवादिनोऽपि ते न अतिभूमिगामिन आसन्। मानवसमाजस्य विकसने अन्यतम-प्रमाणकत्वेनैव तैः राष्ट्रवादः स्वीकृतः। यत्तु तैः आन्तरराष्ट्रियतायाः विरोधः कृतः, स भारतस्य प्रस्तुतावस्थायाम् सा अव्यवहार्या इत्येव। न च ते शस्त्रैकवादिन आसन्। साधनान्तराणां निरुद्धत्वाद् अगतिकतया अस्माकं शस्त्रं शरणीकरणीयम् आसीदिति तैः अनेकदा उक्तमस्ति। न शस्त्रं शस्त्रमित्येव पापम् इति तेषां मतमासीत्, यथा शान्तिवादिनाम्; न तु शस्त्रमित्येव तेषां पुण्यत्वबुद्धिरपि तत्रासीत्। विनियोगाश्रया शस्त्रस्य पुण्यपापता इति हि तेषां मतम्। कालेन तेषां पिस्तुलानि महत्त्वशून्यानि स्युः; यत्सत्यम् अद्यैव सन्ति। या तु तेषाम् उत्कटा स्वातन्त्र्यलालसा, या च अखण्डभारते निष्ठा, यश्च तैः प्रदत्तः हिन्दुत्वमन्त्रः– एते तु चिरस्थायिनः सन्ति, प्रदीर्घकालं च मार्गदर्शनं करिष्यन्ति।

तेषां व्यक्तिशः साफल्यावाप्तिः क्वचिद् हृदयं व्यथयति। वस्तुतस्तु स्वयं स्वातन्त्र्यवीरैः आत्मनो जीवितस्य कृतार्थतायां सर्वात्मना प्रकटीकृतायाम्, के वयं आत्मनः क्षुद्रपरिमाणैः तत्र सिद्ध्यसिद्धी प्रमातुम्? अन्यच्च। स्युर्नाम कदाचित् सावरकरा व्यक्तिशः अयशस्विनः। विजयते तु सावरकरवादः।

* * *

" वीराय तस्मै नमः "

आङ्ग्लं देशमगान्नवे वयसि यो विद्यार्जनस्य च्छलात्
चक्रे संघटितांश्च तत्र वसतो यो भारतीयाञ्जनान् ।
शस्त्राणां चयनं तथा निजभुवे संप्रेषणं छद्मना
यः संपादितवान् कुशाग्रधिषणो वीराय तस्मै नमः ॥ १ ॥

आङ्ग्लानां नयशालिनां बलवतां मध्ये पुरस्तिष्ठता
तेषामेव च विच्छिदे रचयता क्रान्तेर्महद् व्यूहनम् ।
नूनं येन गुहां प्रविश्य अभयं भारः सटाया महान्
आकृष्टः प्रसभं सुखासितहरेर्वीराय तस्मै नमः ॥ २ ॥

त्रैलोक्यप्रथितां प्लुतिं बलवतीं को नाम तां विस्मरेत्
नक्र-ग्राह-भयंकरे गुरुतरेऽपारे महासागरे ।
या विश्वं निखिलं सकौतुक-महाश्चर्याब्धि-मध्ये ऽक्षिपद्
उग्रोदग्रकृति-प्ररूढयशसे वीराय तस्मै नमः ॥ ३ ॥

'पञ्चाशच्छरदात्मकं युवक ते निर्वासनं शासनं
राजद्रोहिण' इत्यनल्पविषमं श्रुत्वैव यो निर्णयम् ।
तत्कालं समघोषयद् 'विजयतां स्वातन्त्र्यलक्ष्मी'रिति
धीरोदात्तरवेण निर्भयमना वीराय तस्मै नमः ॥ ४ ॥

यन्त्रं पेषणसाधनं भ्रमितवान् यः कोऽपि बन्दीव यः
तैलं यन्त्रमबिभ्रमच्च सततं यो मूर्छनान्तं तथा ।
तन्तुच्छेदमथाकरोदहरहर्यो नारिकेलत्वचः
प्रोद्भिन्नै रुधिरै रजत्करतलो वीराय तस्मै नमः ॥ ५ ॥

स्वातन्त्र्यं समुपागतं, क्व नु पुनः स्वातन्त्र्यवीरस्मृतिः ?
स्वातन्त्र्याप्तिमहोत्सवे ऽप्यहह ! तन्नामापि नाश्रूयत ।
किंवा चिन्तनयानया, किममुना साकाङ्क्षमात्माऽऽहुतः ?
बुद्ध्या दिव्य-सतीव्रतं श्रितवते वीराय तस्मै नमः ॥ ६ ॥

त्यागी राष्ट्रस्य भक्तो, जनगणहृदयं नर्तयन्नेकवक्ता
द्रष्टा हिन्दुत्वमन्त्रं, शितमतिशरणो रूढिवर्गस्य भङ्क्ता ।
एको नेता नदीष्णः कुटिलनृपनये, काव्यसृष्टेश्च सम्राड्
भाषाशुद्धेः प्रणेता, इति बहुविधताभूषितं तं नमामि ॥ ७ ॥

'हठादाकृष्टानां कतिपयपदानां रचयिता'
इदं वाक्यं नूनं भवति विषये मे ऽप्यवितथम् ।
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः
पुनामीत्यर्थेऽस्मिन् नरवर मतिर्मे व्यवसिता ॥ ८ ॥

सावरकर - जीवितस्य
विहंगमावलोकनम्

१८८३ जन्म। १९०१ माध्यमिक-शालान्त-परीक्षा, विवाहः। १९०२ फर्ग्युसन-महाविद्यालय-प्रवेशः। १९०५ विदेशीय-वस्त्र-होलिका, बी. ए. परीक्षा। १९०६ आङ्ग्लभूमिगमनम्, मॅझिनि-आत्मचरितानुवादः। १९०८ स्वातन्त्र्यसमरेतिहासः। १९०९ भारते पिस्तुल-प्रेषणम्, धिङ्ग्रा मदनलालकृतः वायली-वधः, अनन्त-कान्हेरे-कृतः जॅक्सन-वधः। १९१० वातावरण-परिवर्तनार्थं पॅरिस-गमनम्, ततो निवृत्तानाम् आङ्ग्ल-भूमौ बन्दिग्राहं ग्रहणम्, मार्सेलिस-समीपे सागरे उत्प्लुत्य पलायनप्रयत्नः, पुनर्ग्रहणम्, भारते अभियोगः। १९११ जीवितद्वयावधिकम् अण्डमाने निर्वासनम्। १९२१ अण्डमानात् भारते पुनरानयनम्, रत्नागिरौ कारावासः। १९२४ कारावासात् मुक्तिः, रत्नागिरौ स्थानबद्धता। १९३७ स्थानबद्धताया मुक्तिः। १९३८ मराठी-साहित्य-संमेलनाध्यक्ष्यम्, भागानगर-नागरिकाधिकारान्दोलनम्। १९३९ द्वितीय-महायुद्धारम्भः, सैनिकीकरणप्रचारः। १९४१ नेताजी-सुभाषचन्द्र-बहिर्गमन-प्रेरणा। १९४३ षष्ट्यब्दपूर्ति-महोत्सवः। १९४४ अखण्ड-भारत-परिषद्। १९४७ भारतस्य स्वातन्त्र्यप्राप्तिः। १९४८ गान्धीहत्यायाम् अभियुक्तत्वम्। १९४९ निर्दोष-मुक्तता। १९५२ 'अभिनव-भारत'-साङ्गतासमाप्तिः। १९५७ स्वातन्त्र्यसमर-शतसांवत्सरिकोत्सवः। १९५८ सावरकराणां ७५ वर्ष-पूर्तिनिमित्तकः अमृतमहोत्सवः। १९६० मृत्युंजयदिनम्। १९६१ पानिपतसमरस्य शतकद्वयपूर्ति-महोत्सवः। १९६३ अशीतिपूर्ति-निमित्तकः उत्सवः। १९६६ महासमाधिः।

तत्रभवतां परमवत्सलः अधिकोषः

❀ दि बॅङ्क ऑफ महाराष्ट्र लिमिटेड ❀

स्वीय – १०६–शाखाभिः श्रीमत्सेवार्थं सदैव सिद्धः।

प्रमाणित-केन्द्र-कार्यालयः–

११७७ बुधवार पेठ, बाजीरावमार्गः पुणें २.

चिं. वि जोग
प्रधानः कार्यदर्शी



क लो न के न्द्र म्
पश्चिमजर्मनीसंघराज्यम्

लघुलहरी १६, १९, २५.
भारतीय-समयः मध्याह्ने १ तः १–३५
संस्कृत-वार्ता-प्रसारण-दिनाङ्काः–
जुलै ७, २१. ऑगस्ट ४, १८

आ का श वा णी-दिल्ली

* संस्कृत–पाठ–प्रसारणम् *

शुभारम्भः १७ जुलै १९६६

+ साप्ताहिक–समाचार–समीक्षा +

कुत्र ? कदा ? ? कथम् ? ? ?

— यथावकाशं 'शारदा' यां प्रकाशयिष्यते। —

शारदा– (पुण्यपत्तनम् २.) ७ : १५–१८ ★ रजि.क्र. एम्. एच्. ५५७
० लायसेन्स क्र. १३७ टु पोस्ट विदौट प्रीपेमेण्ट.

शा र दा–गौ र व–ग्र न्थ मा ला

पुष्पम्	लेखकः	मूल्यम्
१. श्रीराजेन्द्रप्रसादचरितम्	— पं. वासुदेवशास्त्री लाटकर	३.००
२. वात्सल्यरसायनम्	— प्रा. श्री. भा. वर्णेकर	१.००
★३. [illegible]शा सात्त्विकी सताम्	— प्रा. रं. रा. देशपाण्डे	२.००
४. श्रीरामकृष्णपरमहंसीयम्	— प्रा. श्री. भा. वर्णेकर	१.२५
५. बालकानां जवाहरः	— पं. विघ्नहरि देव	०.४०
६. श्रीमान् विन्स्टनः चर्चिलः	— पं. औदुम्बरकर शास्त्री	०.६४
७. अप्पाशास्त्री : साहित्यसमीक्षा	— प्रा. अशोक अकलूजकर	२.००
८. श्रीशिवराज्योदयमहाकाव्यम्	— प्रा. श्री. भा. वर्णेकर	(क्रमशः)
९. 'समानमस्तु वो मनः'	— डॉ. ग. बा. पळसुले	३.००
१०. मराठी–संस्कृत-शब्दकोषः	— जोशी-परांजपे-गाडगीळ	(क्रमशः)
११. आप्पाशास्त्री : जीवनकार्यम्	— पं. औदुम्बरकर वासुदेवशास्त्री	★
१२. विनायक-वीर-गाथा	— डॉ. ग. बा. पळसुले	३.००

★ अप्रकाशितम् !

प त्र व्य व हा र स्था न म्

'शारदा'– कार्यालयः, ४२५ सदाशिव, पुणें २.

संपादकः मुद्रकः प्रकाशकः स्वामी – वसन्त अनन्त गाडगीळ
मुद्रणस्थलम्– यशवन्त मुद्रणालयः, १८३५ सदाशिव, पुण्यपत्तनम् २.
प्रकाशनस्थलम्-१.- म. म. प्रा.द.वा.पोतदार, ३९८ शनवार, पुण्यपत्तनम् २
२.–श्री. ल.म. चक्रदेव, ३१८ राममोहनमार्गः मुम्बापुरी ४
कार्यालयः— खजिनामहालभवनम्, ४२५ सदाशिव, पुण्यपत्तनम् २.

अग्रिमाङ्कः स्वातन्त्र्यदिनविशेषाङ्कः
श्रीकृष्णाष्टमीमहोत्सवे (७ ऑगस्ट १९६६)